# Valli

## NOTE BOOK



Name प्रसन्न वासुदेव चारितम

Class

Subject

PAGES 100

SRI VALLI BINDING WORKS
PRINTERS, BINDERS, BOOK SELLERS.
360 AVENUE ROAD, BANGALORE - 2

॥ श्री गणेश शारदा गुरुभ्यो नमः ॥

॥ प्रसन्नवासुदेवचरितम् ॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

इत्येकमिमं श्लोकं गुरुमहत्तराः श्रीमद्भगवद्गीतायाः पारायणस्यादौ स्मरन्ति पठन्ति च । जगद्गुरुरसौ श्रीकृष्णो भगवान् विचारमूढायार्जुनाय कर्मभक्तिज्ञानयोगान् गीतारूपेणोपदिश्य तस्याज्ञानसंशयान्निवार्य तमनूचानार्यमार्गे प्रैरयदिति श्रूयते । पार्थसारथेर्भगवत उपदेशरूपा सा भगवद्गीताद्यापि विश्वविश्रुतास्ति । तस्य भारतीयार्यधर्मसर्वस्वरूपस्यानुपमस्य श्रीगीताग्रन्थस्योपदेष्टुः श्रीकृष्णस्य ग्रन्थपाठादौ संस्मरणं समुचितमेव यथा, तद्वत् तत्कथापरिचयोऽप्यपेक्षित आर्याणां सूचितं भवतीति स एवात्र पावनः प्रसङ्गः प्रस्तूयते । तत्प्रीत्या परिशील्यताम् ।

पुरा द्वापरयुगस्योपान्त्यसमये चन्द्रवंशजस्य यदोः कुले शूरो नाम महापुरुष आसीत् । तस्य मारिषानाम्न्यां पत्न्यां वसुदे-

वादयो दश पुत्राः पृथाद्याः पञ्च कन्याश्च स-
मभवन् । वसुदेवस्य जन्मकाले देववाद्या-
न्यानकदुन्दुभिमुख्यानि स्वत एव मङ्गल-
तूर्यध्वनिमकुर्वन् । एतेन तद्गृहे परम
पुरुषोऽवतरिष्यतीति सूचना जाता, तथा
वसुदेवस्यापि आनकदुन्दुभिरिति नामा-
न्तरं जातम् । स वसुदेवः क्रमशो विद्यावि-
नीतो भूत्वा गुणसौशील्यादिभिः जनप्रियः सन्
सुक्षत्रिय इति च ख्यातिमलभत । तत्पितुः
शूरस्य मित्रं भोजदेशाधिपः कुन्तिभोजः
स त्वपुत्रः सख्युः शूरस्य कन्यां पृथां पुत्रीत्वे
स्वीकृत्य स्वगृहमानयत् । तत्र तस्याः कुन्तीति
नाम कृत्वा लालनपोषणादिकमकरोत् । ततः
क्रमेण जाता वसुदेवानुजाः सर्वेऽग्रजमनुवर्त-
न्ते स्म । अनुजाताः कन्याश्च क्रमात् संवर्धिताः
ताः क्षत्रियकुमारेभ्यः प्रतिपादिताः सत्यः स्व-
स्वपतिकुलानि प्रत्यपद्यन्त । तां ज्येष्ठां कुन्तीं
तत्पिता पाण्डुनाम्ने कुरुराजदायादाय प्रत्य-
पादयत् । स वसुदेवः पितुः कालादनन्तरं
कुलक्रममनुसृत्य मधुरापत्तने स्वभवने

बन्धुभिः सर्वैः साकमवसत्। यद्यपि नासीत्
तद्वंशस्य राज्यसिंहासनाधिकारः। अथापि ते
क्षत्रिया वीरपुत्राः राजकीयेषु सङ्गमेषु धर्म
पक्षे स्थित्वा स्वकर्मानुष्ठाय तेन च ऐहिका-
मुष्मिकपुरुषार्थान् साधयन्ति स्म।

सकलसम्पत्समृद्धो मथुरानामा स
जनपदः। तत्र स्फीता च मथुरा राजधानी।
तस्यां नगर्यां देवकः उग्रसेनश्चेति राजदाया-
दौ भ्रातरावास्ताम्। अनुज उग्रसेनोऽग्रजं
देवकमतिक्रम्य स्वयं राज्यमध्यास्त। तद-
तिक्रमं सर्वमप्यन्वमन्यत साधुर्देवकः। तस्य पुंप्रजा नासीत्। सः
जातां जातां स्वकन्यां वरगुणसम्पन्नाय वसुदे-
वायैव प्रतिश्रुत्य प्रतिपादयति स्म। तथैव त-
दनुज उग्रसेनः स्वकन्यास्वेकैकामेकैकस्मै
वसुदेवानुजायैव प्रत्यपादयत्। उग्रसेनपुत्रेषु
ज्येष्ठः कंसः। सोऽविनीतः प्रकृत्यातीव धृष्टः।
~~देवकस्य पुंप्रजा नासीत्~~। बाल्यात्प्रभृत्याशिक्षि-
तः कंसः दुर्जनैः सङ्गम्य गुरुमहत्तरानवमन्य-
ते स्म। वयस्थश्च सः पितरमप्यतिक्रम्य प्रा-
येण राजकर्म स्वयमेव कर्तुमारभत। अथ तस्य

नीति त्यानि र्णे चमकार

मगधराजपुत्रीभ्यामस्तिप्राप्तिभ्यां साकं विवा-
होऽभवत् । तस्य श्वशुरोऽपि जरासन्धः कठोरः।
महत्तरस्य श्वशुरस्याश्रयेण जामाता कंसः
पुनरतीवोत्सिक्तोऽभवत् ।

देवकपुत्रीषु कनिष्ठा देवकी । ~~प्र~~ प्रकृत्या च
साध्वी सा क्रमेण विवाहयोग्याभवत् । ततः पू-
र्वसङ्कल्पानुरोधेन देवकीवसुदेवयोः परि-
णयोत्सवः प्रावर्तत । तस्मिन्नुत्सवे कन्या-
प्रतिपादनाय वधूवरयोर्यात्रोत्सवो यदा प्रक-
ल्पितस्तदा कंसः स्ववैभवाडम्बरं प्रदर्शयि-
तुकामः सन् दम्पतिरथे स्वयं सारथीभूत्वा
अश्वान् चोदयति स्म । तस्याट्टहासो विधि-
ना नामृष्यत । नरेण (पुरुषेण) चिन्त्यते किञ्चिद्दैवे-
नान्यद्विधीयते किल । तदानीं किलाकाश
अशरीरिणी वागाविरासीत् — रे दुष्ट कंस,
तव गर्वेणालम् । अस्या एव भगिन्या अष्टमो
गर्भजातस्त्वां हनिष्यतीत्युक्त्वा व्यरमताका-
शवाणी । निष्ठुरोक्तिं तां श्रुत्वा सद्यः कोपात्
प्रज्वलितः कंसः स्वापायनिदानभूतां भगि-
नीमेव (प्रथमं) मारयामीति खड्गमादायोदति-
सद्यो

१ रोहिणीत्याद्याः षट् क्षत्रियकन्याश्च



क्षत्। तदा वसुदेवस्तं प्रति सामवचनैः पाप
दोषानबोधयत्। अथापि पापोऽसौ यदा न
व्यरमत तदा गत्यन्तरमपश्यन् सः अस्याः
जातं जातं शिशुं तुभ्यमर्पयामीति प्रत्यशृणोत्।
तदा किल तद्वसुदेववचनविश्वासेन दुष्टोऽसौ
भगिनीं मुक्त्वामर्षात्ततः स्वभवनाय निरगच्छत्।
एवं पुनरुज्जीवितया तया नववध्वा साकं वसु-
देवोऽपि स्वमन्दिरं प्राप। अत्रान्तरे ^ वसुदेव-
स्य प्रज्ञापराक्रमादिगुणान् माहाभाग्यलक्षणा-
नि च निशम्यानुरक्तास्तमागत्य ^ स्वयमेवावृ-
ण्वन्। वसुदेवस्ताभिः सर्वाभिः प्रियाभिः स-
र्वबन्धुभिश्चोपेतः स्वभवने कञ्चित्कालं सु-
खेनात्यवहत्। अथ च कालक्रमेण तत्प-
त्न्यः पुत्रवत्योऽभवन्। देवकी यदा प्रथमं
पुत्रमसूत तदा वसुदेवः स्वसत्यं पालयन्
तं शिशुमर्पयितुं कंससमीपमनयत्। तदा स-
न्तुष्टः कंस एवमुवाच - भद्र, प्रीतोऽस्मि।
ममानेन शिशुनालम्। अष्टमशिशुं तु न
मोक्ष्यामि। तदा त्ववश्यमर्पय। एतं गृही-
त्वा पोषय। इति तस्य वाक्येन सन्तुष्टोऽपि

वसुदेवः मनसि शङ्कमान एव यावत्प्रचलित-
स्तावत्तत्र देवर्षिर्नारदः प्रत्यक्षो भूत्वा कंसं
प्रति तज्जन्मान्तरं संस्मार्य राजकार्यमबो-
धयत्। तेन च स पापः आत्मनः कालने-
मित्वं स्मृत्वा देवपक्षप्रपीडनाय निश्चयम-
करोत्। सहसा कोपोन्मत्तश्च सः तत्क्षणे
वसुदेवहस्तात्तं शिशुमुद्धृत्य चरणयोर्गृही-
त्वा शिलातले वस्त्रमिव पोथयित्वामारयत्।
पुनश्च वैरनिर्यातनोद्देशेन वसुदेवं देवकीं
च बन्धयित्वा कारागृहेऽस्थापयत्। तद्बा-
न्धवपरिवारमपि नैकव्याजमुत्पाद्य पीड-
यितुमारभत। तदान्या वसुदेवपत्न्योऽपि
कंसभयोद्विग्नाः सत्यः तद्वसतिं त्यक्त्वा देशा-
न्तरेषु प्रावसन्। रोहिणी नाम्न्येका तु गो-
कुलं गत्वा स्वपतेः प्रियमित्रस्य गोपाधिप-
स्य श्रीनन्दस्याश्रये नित्यवसतिमकल्प-
यत्।

नैतावता कंसस्य कोप उपशान्तः। गुरुम-
हत्तरोपदेशं न स कर्णे चकार। पितरमुग्रसे-
नमपि कारायां बन्धयित्वा स्वयमात्मानं रा-

जानमुदघोषयत्। तदानेके दुष्टाशयाः मुष्टिकचाणूर पूतना प्रलम्ब धेनुकादयः खलाः परश्शताः सगन्धं कंसँ प्रभुं समाश्रयन्। अथ तद्देशे राजा तस्याधिकृताः कर्मचारिणः सेवकाश्च सर्वे दस्युरूपाः स्वच्छन्दचारिणोऽभूवन्। व्यवहारे सर्वत्र कापट्यं पुनश्च करोत्कोचशुल्कादय अतीवाभवन्। विलासपरा लम्पटास्ते राजपुरुषाः अशान्ताः प्रजाः पीडयन्ति स्म। धर्मसेतुमुल्लङ्घ्य साधुसज्जनानवमन्यन्ते स्म।

ततः परतरे वर्षेऽपि कंसः द्वितीयं देवकीपुत्रं पूर्ववदमारयत्। पुनश्च परं परतरं चेत्येवं पापोऽसौ षट् शिशुहत्या अकरोत्। एवं वारंवारं महद्दुःखमप्रतीकारमुपनतमनुभूयानुभूय तौ दम्पती भगवन्तमेवानन्यभावेनोपातिष्ठताम्। एवं सज्जनानां स्वयं दौःस्थ्यं दुष्टदौर्जन्यं चेति लोकदुःस्थितिं संलक्ष्य यदा यदा हि धर्मस्य ग्लानिर्भवति भारत, अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति स्वप्रतिज्ञानुरोधेन भगवान् स्वावताराय प्राप्तकालममन्यत। अत्रान्तरेऽमुष्मिन् देवलोकेऽपि गो भू देवी देवैश्च भूभारहरणाय सम्प्रार्थितो

भगवान् श्रीहरिः भूलोकेऽत्र स्वावतारं प्रतिशुश्राव किल। तदेतैः कारणैस्ततः प्रभृति लोकेऽस्मिन् श्रीमतो योगेश्वरस्य योगमायाख्य महिमा अव्यक्तरूपेण प्रावर्तत। ततः

सप्तमवारं यदा देवकी गर्भिण्यासीत्तदा भगवदादेशेन योगमाया तं गर्भमाकृष्य गोकुलस्थाया रोहिण्याः कुक्षावस्थापयत्। ततो गर्भाकर्षणजातं तस्याः पुत्रं सङ्कर्षणनाम्नाह्वयन्। सः वसुदेवस्य ज्येष्ठः पुत्रो नन्दाश्रये वर्धते स्म। इतो मधुरायां तु देवक्या गर्भो नष्ट इति प्रतीतिरासीत्। एतदेवं देवरहस्यं न केनापि ज्ञातम्। कंसस्तु मायाव्यामोहितो मृत्युभयोद्विग्नश्च वसुदेवादीनधिकाधिकं पीडयति स्म।

अथास्मिन्नवसरे दुष्टनिग्रहं कृत्वा शिष्टरक्षा कर्तव्या। भूभारहरणं कर्तव्यम्। विशेषत एकान्तभक्तस्य वसुदेवस्य परमानुग्रहः कार्य इत्यनेकैः कार्यकारणैः सत्वरः श्रीहरिः भूलोकावतरणाय स्वांशरूपेण देवक्याः गर्भं प्राविशत्। तस्मिन् गर्भवासकाले ब्रह्मादयो देवा एकान्त आगत्य गर्भस्तुतिमकुर्वन्निति पुराणविदः समामनन्ति। यथा यथा

गर्भो वर्धते तथा तथा दिने दिने तयोरत्यन्ततेजस्वि-
नोर्दम्पत्योस्तेजो विशेषेणाप्रातिभः कंसः किमप्य-
पकर्तुमक्षमः प्रसूतिकालमेव प्रतीक्षते स्म। ततश्च
पूर्णे गर्भे मासे श्रावणकृष्णाष्टमीदिने निशीथे
जयन्ती मुहूर्ते भगवान् देवकीगर्भादवातरत्। त-
ज्जन्मकालः सर्वभूतानामानन्दमय आसीत्। स
आदौ मातापित्रोर्विस्रम्भार्थं स्वदिव्यतेजोरूपेणैवा-
विरासीत्। मेघश्यामं पीतकौशेयवासं श्रीवत्सा-
ङ्कं कौस्तुभोद्भासिताङ्गं चतुर्भुजं सशङ्खचक्रं स-
किरीटकुण्डलं सरसीरुहेक्षणं दिव्यमङ्गलविग्रहं
सप्रेमदयामन्दहासं देवदेवं तं साक्षाद्दृष्ट्वा दम्प-
ती तौ सभक्त्यानन्दं प्रणम्य तिष्ठतः स्म। भगवान्
तदानुग्रहकटाक्षेणानन्दयन् वसुदेवमुद्दिश्यैव-
मभाषत – भोस्तात, अलमिदानीं विषादेन।
फलितं ते भाग्यं मन्यस्व। अचिरेण सर्वसौख्य-
मवाप्स्यसि। अहमिदानीं शिशुरूपं धारयामि।
शिशुं मामस्मिन्नेव क्षणे गोकुलं नीत्वा तत्र नन्द
गेहिन्याः पार्श्वे स्थापय। तस्याश्चाद्य स्वयं योग-
माया एका कन्यारूपेण जाता। तां तत आनीय
अत्र स्थापय। अद्य योगमायामहिम्नात्र मथुरायां

गोकुलेऽपि मनुष्यादयः सर्वेऽपि प्राणिनो गाढ
निद्रया प्रज्ञाहीना वर्तन्ते । तवोद्यमं न कोऽपिज्ञा-
स्यति । बाढं ते दैवसहायोऽस्तीत्युक्त्वा भगवान्
स्वयं शिशुरभवत् ।

दैवानुग्रहे किमु दुष्करम् । सद्यः सुविस्र-
ब्धौ दम्पती । आनकदुन्दुभिरपि यावत्कार्य-
मध्यवस्यति तदैव तस्य निगडं द्वारमुद्रादिकं
सर्वमपि स्वयमेवोद्घाट्य कार्यमार्गः सुगमोऽभ-
वत् । इत्थं च पुंशिशुं गोकुलस्थाया यशोदायाः
पार्श्वं प्रापय्य तत्रस्थं कन्याशिशुं गृहीत्वा देवकी
समीपमवाप । मायामहिम्ना तन्निगूढकार्यन्ते
कारागृहस्य द्वारमुद्रादिकं यथापूर्वमवर्तत।

ततो मुहूर्तानन्तरं प्रभाते शिशो रोदनध्वनिना
प्रबुद्धा रक्षापुरुषाः सरभसं गत्वा कंसाय तद्वार्तान्य-
वेदयन् । क्रूरोऽसौ सत्वरमागत्य शिशुं यावदुद्धरति
स्म तदा देवकी - कन्येयं जाता, एतया न तेऽपायाश-
ङ्का, तत्प्रतिमुच्यास्मान् पाहीत्ययाचत । अथापि
सोऽसुरो शिशुं बलादुद्धृत्य शिलायां यावत्पोथ-
नायायतत तावत्सा कन्या तद्धस्तादाकाशमु-
ल्लङ्घ्य घोरेण रूपेण स्वरेण च कंसं तर्जयन्ती

रे पाप, वृथा ते साहसः, तव शत्रुर्जातो नित्यं व-
र्धत एवेत्युक्त्वा तत्रैव तिरोऽभवत्। तदाप्रतिभो
भयोद्विग्नश्च कंस हताशोऽवतस्थे।

इतश्च गोकुले प्रभाति महान् सम्भ्रमः प्रावर्तत। गोपाधि-
पो नन्दः पुत्रोत्सिवलाभेन प्रहर्षं वहन् स्वजनैः
साकं महत्समारोहमवर्तयत्। बाढं स पुत्रमौर-
सममन्यत। गोप्यो गोपाश्च सर्व आगत्य दम्प-
त्योः शिशोश्च शुभाशीर्भिरभ्यनन्दयन्। तत्रस्था
रोहिणी नवजातशिशोरात्मपुत्रस्य च क्षेमा-
भ्युदयाय स्वस्तिवाचनं कालोचितं कुलदेवता-
र्चनं चाकारयत्। नन्दोऽपि विभवानुगुणं दी-
नानाथान् समतर्पयत्। मान्यांश्चामानयत्।

अत्रान्तरे मृत्युभयत्रस्तः कंसो वितर्कया-
मास। यदीदानीं वसुदेवः प्ररोचितः स्यात् स
पश्चादात्मानं मरणान्मोचयिष्यतीत्यालोच्य
तत्क्षणे देवकीवसुदेवौ बन्धनाद्विमुच्य सान्त्व-
वचनैश्चाश्वास्य तद्गृहं प्रापयत्। स्वभवनं
प्रतिनिवृत्तो वसुदेवः सर्वान् स्वजनानाकारयि-
त्वा तैः सह यथापूर्वं स्वस्थोऽतिष्ठत्। गोकुल-
स्था रोहिणी पुत्रयोगक्षेमं करोत्वित्यालोच्यैव

तामेकां तु स्वसमीपं नाकारयत्। सापि स्वकर्तव्यं यथार्हं निरवहत्। निगूढं वसुदेवप्रार्थितः पुरोहितो गर्गर्षिः नामकरणाय नन्दगृहमागच्छत्। नन्दोऽपि कालाहूतवदभ्यागतं महर्षिं गर्गं स्वागतादिभिरभ्यर्च्य शिशुद्वयस्य नामाधत्स्वेति प्रार्थयत। ऋषिरपि रहस्यमप्रकाश्यैव यजमानाभिमतेन ज्येष्ठस्य बलरामेति कनिष्ठस्य कृष्णेति च नामकरणं चकार। ततो मुनेर्निर्गमनान्तरं रोहिणी स्वकुलाचाररीत्या सदा जागरूका सती पुत्रद्वयस्यापि लालनपोषणादिकं कुर्वती भर्तुरुद्देशं बाढं निरवहत्। यशोदायास्तु पुत्राप्त्या सन्तोषः कियन्मात्र इति वर्णयितुं कः शक्नुयात्? इत्थं च नन्दगृहे नित्योत्सव इव कालो गच्छति स्म।

इतो मधुरायां कंसः अहर्निशं चिन्ताभयोद्विग्नः स्वसहचरैः साकं मन्त्रयमाणः शत्रुनाशाय बहुधोपायानारचयत्। येन केनापि प्रकारेण यथा शत्रुः नश्येत्तथा यतध्वमिति स्वभृत्यानाज्ञापयत्। साधुर्वा असाधुर्वा मृदुर्वा क्रूरो वा ऋजुर्वा कपटो वा उपायो रचयितव्य इति राजाज्ञानुसारेण कूटचारिणो भूत्वा ते कंसभृत्याः पुरग्रामव्रजपल्लीश्रेणिषु पर्यट-

न्तो मायाविनः प्रकाशमप्रकाशं च पर्यलुण्ठन्। परस्व परस्त्री परप्राण हरण रूप कुकार्याणां सङ्ख्या नासीत्। एवं च प्रजाः बहुधापीड्यन्त।

मासाभ्यन्तरे प्रायः षण्मासा व्यतीता आनन्देन। अथो नन्दस्यापरिहार्यं कार्यगौरवमापातितम्। अतश्च सः कंसाय राजधनं समर्पयितुं राजधानीं प्रति प्राचलत्। तत्र गत्वा प्रभुदर्शनपूर्वकं करशुल्कादिकं वार्षिकधनादायं समर्प्य राज्ञाज्ञप्ते कचिद्वसतिगृहे विश्राम्यति स्म। तदा समयं साधयित्वा वसुदेव एकान्ते मित्रं सङ्गम्य योगक्षेमवार्तामकरोत्। तयोः प्रीतिसमागमे वसुदेवो वार्धके नन्दस्य पुत्रोत्सवं प्रस्तुत्याभ्यनन्दत्। नन्दोऽपि वसुदेवस्य कंसकृतविप्रियाणि प्रति बहन्वतप्यत। एवं च सहानुभूत्युज्ज्वलोपचारान्ते वसुदेवो नन्दमुद्दिश्य पुत्रविषयेऽजागरूकतयाऽभद्रतां संसूच्य प्रवासात्सद्यो गोकुलं प्रति निवर्तस्वेति समत्वरयत्। सोऽपि मित्रवचनं मानयन् तद्दिन एव ततो निरगच्छत्।
प्रमाणीकृत्य

## पूतनावधः

छिद्रेष्वनर्था बहुलीभवन्तीति बहुज्ञा वदन्ति। तथाहि। नन्दस्यासन्निधाने पूतना नाम राक्षसी (आगत्य नन्दगेहे) गोकुलमागत्य सायं समये नन्दगेहं प्राविशत्। सा कंसभृत्या मायाविनी क्रूरा शिशुरक्तमांसलोलुपा च ग्रामान्तरेषु वेषान्तरेण सञ्चरन्ती स्वविषमयस्तन्यदानेन नैकाः शिशुहत्याः कृत्वागतासीत्। मायासुवेषच्छन्ना सात्मानं धात्रेयिकां व्यपदिश्य यशोदारोहिण्योः विश्वासमुत्पाद्य च शिशुलालनव्याजेन बालकृष्णं स्वाङ्कमारोपयत्। विश्वस्ते च ते देव्यौ यदाभ्यन्तरं प्रविष्टे तदा शिशुहननेच्छया स्वस्तन्यमधापयद्राक्षसी। परं तु लीलाशिशोरन्तर्यामिणः किं वा नाविदितम्! सोऽद्भुतः शिशुः तस्मिन्क्षणे तस्याः स्तन्येन सार्कं प्राणानप्यपिबत्। सहसा प्राणाकर्षणेन भृशपीडिता सा राक्षसी कर्कशमुच्चैः क्रोशन्ती निजरूपेण मृताऽधो न्यपतत्। सभयचकिते देव्यौ सहसागत्य पश्यतश्चेद् बालो घोरकलेवरस्योपरि क्रीडन्नासीत्। यशोदा सत्वरं शिशुमुद्धृत्य दूरमपाक्रामत्। ततः सा

बालारिष्टस्य शान्तिकर्म च करोति स्म। तावति काले चीत्कारध्वनिना साचकितमागता गोपाः तत्रत्यं सर्वं विदित्वा तच्छवं शीघ्रं सुदूरमनयन्। तत्र निशीथे मधुरातः प्रतिनिवृत्तो नन्दः सकलं वृत्तं निशम्य वसुदेवप्रबोधितं स्मरन् च डोलास्थं सुखसुप्तं पुत्रं दृष्ट्वैव समुच्छ्वसितोऽभवत्।

## शकटवधः

ततः परं क्षेमेण संवत्सरे पूर्णे प्रथमो वर्धापनोत्सवः सम्भ्रमेण प्रावर्तत। जन्मर्क्षदिने प्रातः शिशोर्मङ्गलमज्जनादिकं कारयित्वा क्षीरं पाययित्वा च यशोदाद्याः स्त्रियः अन्यान्यकर्मसु व्यापृता आसन्। ततः क्षणेन बालकृष्ण इतस्ततो रिङ्गमाणो देहलीं क्रान्त्वा बहिर्गृहाङ्गणे क्रीडति स्म। यदृच्छया तत्र शकटो नामासुर आययौ। शकटरूपः कंसभृत्यः स मायावी स्वचक्रपरिवर्तनव्याजेन ग्रामादिषु शिशुबालादीन् बहून् हत्वागत आसीत्। सः क्रीडन्तं श्रीकृष्णं दृष्ट्वा जिघांसुर्यदा समीपमागतस्तदा मायेशः स श्रीकृष्णः तं शकटमुद्दिश्य पदा प्राहरत्। तेन वज्रपातसदृशेन पादाघातेन कृत्स्नोऽपि शकट ऊर्ध्वमुत्क्षिप्तः सन् प्राङ्गणे दूरं निपत्य निजरूपेण मृतः। तदद्भुतं वीक्ष्य सर्वेऽपि विस्मिताः। दैवानुग्रहेणैव

बालः सुरक्षित इति मन्वानो नन्दः विशेषतः शान्तिकर्माण्यकारयत्। यशोदारोहिण्यौ च क्षेमाभ्युदयाय रक्षाबन्धनादिविधिभिः वर्धापनोत्सवं समग्रं व्यतनुताम्। ततः परम् – (श्लोकः)

कालेन व्रजताल्पेन गोकुले रामकेशवौ।
जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः॥

मुग्धरूपयोश्चारुहासयोः स्निग्धस्वरूपयोस्तयोर्बाललीलाभिः सर्वेऽपि गोकुलस्थाः स्त्रीपुरुषाः परममुदं संवहन्ति स्म। न कस्याप्युदेति मनागपीर्ष्या।

तृणावर्तवधः

अथैकदा तृणावर्तो नाम कंसभृत्यस्तत्राजगाम। छद्मचारी सोऽसुरः चक्रवातो भूत्वा शिशुबालादीन् सोत्क्षेपपातं पातयति स्म। गृहाङ्गणस्थितं बालकृष्णं दृष्ट्वैव स रभसवायुरूपेण मायया बालमुत्क्षिप्याकाशमनयत्। प्रवातपांसुवर्षणेन जनाः सर्वेऽत्याकुलाः न किञ्चनाबुध्यन्त। सहसा क्षिप्तः कृष्णोऽन्तर्यामी तत्रैवाकाशे दैत्यस्य कण्ठं कराभ्यां गाढमपीडयत्। गलग्रहक्षणे श्वासबन्धात्क्लिष्टोऽसुरो निजरूपेण मृतो भूमौ पपात। चक्रवाते प्रशान्ते सति ग्रामाद्बहिः पतितमसुरं तस्योपरि प्रक्रीडन्तं बालकृष्णं च तत्रत्या गोपा दृष्ट्वानुपदं

तं यशोदासमीपं प्रापयन् । तावत्कालं पुत्रमप-
श्यती व्याकुला सती च सा प्रत्यागतप्राणेव वत्सलं
तं गाढमाश्लिष्य गुरूपदिष्टं कालोचितं शान्ति
कर्माण्यकारयत् । — बाललीला —

ततः शुक्लेन्दुवद्दिने दिने परिवर्धमानौ वत्स-
लौ रामकृष्णौ सर्वदा सहचरौ भूत्वा चारुलीला
विशेषैर्निखिलगोपीगोपानां मनोनन्दनावभव-
ताम् । तावेकदा गृहे क्रीडतः । क्षणे पात्रभाण्डादी-
न्यालोडयतः । क्षणान्तरे पांसुषु वा भस्मराशिषु
वा विलुण्ठतः । कदाचित्स्वाङ्गेषु भस्माङ्गार वर्षं
कृत्वा नृत्यतः । अन्यदा गोष्ठे वा कचिद्वत्सवाटे
वा गोवत्सपुच्छग्राहाकर्षणेनोपद्रवं कुरुतः । कदा-
चिच्च वयस्यबालकैः सह परिक्रीडतः । (श्लोक)

वैचित्र्यं भगवान् कृष्णो वयस्यैर्व्रजबालकैः ।
सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् ॥

कवयः किल वर्णयन्ति नवनीतनवाहारी-
ति नवनीतनट इति च । बालास्ते यूथशः परि-
क्रीडन्तो गृहे गृहे कूटविनोदेन सञ्चरन्तश्च त-
त्र तत्र निलीय नवनीतं चोरयन्ति स्म । वयस्यसङ्घ-
स्य मुखरः श्रीकृष्णः । तत्सनाथा रामादयो बालाः

बहुशो नवनीतान्यालोडयन्। विशेषेण तु स बा-
लकृष्णो स्त्रीणामेव नानाकैतवोपद्रवं करोति स्म।
एवं पदे पदे उद्वेजितास्ताः—

कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम्।
सेर्ष्यस्नेहेन तन्मातुरिति होचुः समागताः॥

वत्सान् मुञ्चन् क्वचिदसमये क्रोशसञ्जातहासः
स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः।
मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भाण्डं भिनत्ति
द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान्॥
हस्ताग्राह्ये रचयति विधिं पीठिकोलूखलाद्यैः
छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वित्।
इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिः
व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत्॥

अथैकदा पांसुषु क्रीडन् कृष्णो मृदमभक्षय-
दिति सहचरास्तन्मातरेऽकथयन्। सा परीक्षे त्वदास्य-
मिति यावत्पश्यति तदा तत्र चतुर्दशभुवनमशेषमस-
म्मर्देन स्थितं विलोक्य तत्क्षणे विज्ञाततत्त्वा सती
सभक्तिश्रद्धा स्तुतिवाक्यान्युदाहरति स्म। तावतैव
श्रीकृष्णः किल लोकमोहनं मन्दहासं व्यतनोत्। त-
च्चारुहासमात्रया मायया विमोहिता सा देवी तत्क्षणे

सर्वं विस्मृत्य ममायं पुत्रः अहमस्य जननीति पूर्व-
वदभिमानपूर्वकं ममताभावबद्धासीत्। (श्लो०)
त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सूरिभिः।
उपश्लोकितमाहात्म्यं हरिं सामन्यतात्मजम्॥

॥ यमलार्जुनभङ्गः ॥

एकदा गृहदासीषु यशोदा नन्दगेहिनी।
कर्मान्तरनियुक्तासु मथ्नाति स्म स्वयं दधि॥
यानि यानीह कृष्णस्य हासचेष्टावलोकनम्।
दधिनिर्मथने काले स्मरन्ती तान्यगायत॥
तां स्तन्यकाम आसाद्य मथ्नन्तीं जननीं हरिः।
गृहीत्वा दधिमन्थानं न्यषेधत्प्रीतिमावहन्॥

एवमनुरुद्धा सुतवत्सला यशोदा तस्मै स्तन्यं पाययति स्म यावत्तावच्चुल्यामधिश्रितं क्षीरमुत्सिच्यमानं विलोक्य बालमतृप्तमेव सह-सावतार्य ततोऽधावत्। तेन प्रकुपितो बालो मन्थानेन दधिभाण्डं भङ्क्त्वा नवनीतं जग्धवांश्च पुनः शिक्योपरिस्थमप्यालोडयति स्म। प्रत्यागता जननी पुत्रचेष्टितं सर्वं विलोक्य प्रकुपिता तं यष्टिकया दण्डयामीत्यन्वसरत्। चपलचटुलं बालं गृहीतुं सुशकं किम्? (श्लोकः)

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽर्भकश्चापससार भीतवत्।
गोपस्त्यधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः॥

अतीवानुद्रुत्य श्रान्तायां मातरि दयालुः श्रीकृष्णो भीतवदेकत्र हस्ताभ्यां नेत्रे कषन्नतिष्ठत्। झटिति तं गृहीत्वा जननी – (श्लोकः)

तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा॥

कृते बन्धनयत्ने तद्बन्धनदामाङ्गुलिमात्रं न्यूनमासीत्। तदान्यद्दाम तस्य संयोज्य ग्रन्थिकरणायायतत। अथापि तत्पूर्वमिव न्यूनमेवास्त। किं चान्यत्पुनरपरमिति गृहस्थितं सकलं दाम संयोज्यापि यदा ग्रन्थिकरणायाक्षममासीत्तदा सा खिन्नाभवत्। पुनर्मातरं प्रति पुत्रः किलादयत। तदा तु ग्रन्थिकरणे सा सफलश्रमाभवत्। रे चपल, गच्छ, क्वेदानीं गमिष्यसीति निर्भर्त्स्य कार्यान्तराय गृहान्तरं गच्छत्। (श्लो॰)

कृष्णस्तु मातरं वीक्ष्य गृहकार्येषु तत्पराम्।
अपश्यदर्जुनौ पूर्वं गन्धर्वौ धनदात्मजौ॥
नारदस्य तु शापेन वृक्षौ यौ गर्वकारणात्।
तयोः प्रसन्नो भगवान् शापान्मोचयितुं गतः॥

रज्जुना बद्धमुलूखलमपि विकर्षन् बालकृष्णो वेगेन प्राचलत्। गत्वा च किञ्चिद्दूरस्थितयोः परस्पर संश्लिष्टयोर्यमलार्जुनवृक्षयोः सङ्कीर्णे सन्धौ (सरभसं) प्राविशत्। तत्क्षणे वृक्षद्वयमपि चोन्मूल्य द्वयोः पार्श्वयोर्न्यपतताम्। तदा शापान्मुक्तौ तौ गन्धर्वौ निजरूपेण श्रीकृष्णं प्रणम्यैवम् स्तुवताम् -

कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः।
त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः॥
नमस्तुभ्यं भगवते यदूनां पतये नमः।
अनुजानीहि नौ देव तवानुचरकिङ्करौ।

एवं स्तुतेन श्रीकृष्णेनानुज्ञातौ तौ गन्धर्वौ प्रदक्षिणं परिक्रम्य ततो निरगच्छताम्। अत्रान्तरे महावृक्षपातजं भीषणशब्दं श्रुत्वा ससम्भ्रममागता गोपाः चारुहासं दाम्नोलूखलबद्धं श्रीकृष्णमपश्यन्। तादृशेऽप्युत्पाते कृष्णस्यानपायं निशाम्य दैवलीलाचिन्तनीयेत्यभ्यनन्दन्। ततो मोचितो बालकृष्णः पुनर्मिलित्वा वयस्यैः साकमतिविलं यत्र तत्र प्रक्रीडन्नेवासीत्। तदनन्तरं च - (श्लो॰)

सरितीरगतं कृष्णं भग्नार्जुनमथाह्वयत्।
रामं च रोहिणी देवी क्रीडन्तं बालकैर्भृशम्॥

यशोदाह्वयते कृष्णं पुत्रस्नेहान्मुहुर्मुहुः।
कृष्ण कृष्णारविन्दाक्ष तात एहि पयः पिब ॥
हे रामागच्छ ताताशु सानुजः कुलनन्दन ।
प्रातरेव कृताहारस्तद्भवान् भोक्तुमर्हति ॥
प्रतीक्षते त्वां दाशार्ह भोजनाय व्रजाधिपः ।
एह्यावयोः प्रियं धेहि स्वगृहान् यात बालकाः ॥
इत्थं यशोदा तमशेषशेखरं
मत्वा सुतं स्नेहनिबद्धधीर्बलात् ।
हस्ते गृहीत्वा सहराममच्युतं
नीत्वा स्वगेहं कृतवत्यथोदयम् ॥

॥ वृन्दावनगमनम् ॥

एतस्मिन्नन्तरे गोपाधिपो नन्दः ग्रामवृद्धानाहूय मन्त्रालोचनं करोति स्म। सः पदे पदे प्रत्युपनतानि दुर्निमित्तानि व्याचख्यौ । ततश्च गोपवृद्धाः भयोद्विग्नाः सन्तो वसतिपरित्यागाय निश्चित्य वृन्दावनं नाम प्रदेशान्तरं यमुनातटं गमिष्याम इति च निर्णयमकुर्वन् । एवं वसतिपरिवर्तने सर्वानुमते सति सर्वे गोपाः पुरुषाः स्त्रियो बाला वृद्धाश्च प्रवासोद्यमं कुर्वन्ति स्म। शकटेषु गोमहिषादिपशूपरि च सकलवस्तुसम्भारा- नारोप्याग्रे भूयसोत्साहा प्राचलन् । तदैकस्मिन्

शकटे ससुते सहोपविष्टे यशोदारोहिण्यौ रामकृष्ण-
सम्बन्धिनी एव लीलावार्ताः संलपतः स्म । तथैवान्ये
गोपीगोपाश्च तन्नन्दनयोरेवाद्भुतवृत्तं वर्णयन्ति स्म
गायन्ति स्म । एवं च यात्रोत्सवप्रायेण प्रयाणेन ते सर्वे
गोपाः सपरिवाराः क्रमेण वृन्दावनं प्राप्नुवन् । तत्र च
यमुनातीरदेशेऽनुकूले स्थले स्वसौकर्यानुगुणं वास
गृहाणि गोगोष्ठानि वत्सवाटांश्च परिकल्प्य सुखे-
न प्रतिवस्तुमारभन्त ।

॥ वृन्दावनवसतिः ॥

(श्लो॰) वृन्दावनं गोवर्धनं यमुनापुलिनानि च ।
वीक्ष्यासीदुत्तमा प्रीतिः रामकेशवयोस्तदा ॥

इत्थं च निसर्गानुकूल्येन वयस्यगणप्रोत्साहेन स्व
भावसिद्धलीलापाटवेन चोत्तेजितौ रामकृष्णौ त-
स्मिन् वृन्दावने क्रीडाविनोदैर्विजह्रतुः । लोकमो-
हनयोस्तयोर्लीलाः दृष्ट्वा दृष्ट्वा प्रहृष्टाः प्रमुग्धाश्च
सर्वे गोपीगोपाः सर्वमेव भवक्लेशं व्यस्मरन् । कृष्णस्तु

(श्लो॰) गोपीभिः स्तोभितोऽनृत्यद् भगवान्बालवत्क्वचित् ।
उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयन्त्रवत् ॥
बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकम् ।
बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥

एकदा श्रेण्यागतायाः फलविक्रयिण्याः वाक्यं -

(श्लो.) क्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्युतः।
फलार्थी धान्यमादाय दत्वा फलमयाचत ॥
फलविक्रयिणी तस्य दत्तधान्यं करद्वयम्।
फलैरपूरयद्धान्यैः फलभाण्डमपूरि च ॥

॥ व्यायामपरिश्रमः ॥

रामादयः कृष्णप्रमुखा गोपबालाः सम्मिलिताः कदाचिद्गृहेषु बहिर्वान्यदा वनप्रान्ते वने वा पुनश्च गिरिदुर्गेषु वा तत्सानुषु वैकदा नदीजले तत्तीरे वेत्येवं क्रीडारसं निर्विशन्ति स्म तथा नानाविधान् व्यायामपरिश्रमांश्चानुभवन्ति स्म । नास्ति किल किञ्चित्तादृशं क्रीडाकौतुकं व्यायामविधानं वा यत्तैस्तदा नोपसेवितम्।

एवं गोपजनप्रीतिं यच्छन्तौ बालचेष्टितैः।
कालवाक्यैः स्वकालेन वत्सपालौ बभूवतुः॥
तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ।
सप्रातराशौ गोवत्सांश्चारयन्तौ विचेरतुः॥

॥ वत्सासुर बकदैत्य संहारः ॥

कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः।
वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥

तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः।
दर्शयन्बलदेवाय लीलयैव न्यषूदयत् ॥
अथैकदा बको नाम मायावी बकरूपधृक्।
आगत्य सहसा कृष्णमग्रहीत्स्वचञ्चुकोटिना ॥
मर्मज्ञः श्रीकृष्णस्तु कंसप्रेरितं मत्वा तं च --
पश्यत्सु बालेषु ददार लीलया
मुदावहो वीरणवद्दिवौकसाम्।
तदा बकारिं सुरलोकवासिनः
समाकिरन्नन्दनमल्लिकाभिः ॥

॥ अघासुरवधः ॥

कंसभृत्येषु महामायोऽघासुरः कदाचित्तत्रागतः। सः रामकृष्णादीन् सर्वान् बालान्युगपद् ग्रसिष्य इत्यालोच्याजगररूपं धृत्वा च वृन्दावनद्वारे मुखं व्यादायातिष्ठत्। वत्सांश्चारयन्तो गोपबालास्तत्रागताः न किञ्चित् परामृश्यैव गुहामिवाजगरमुखबिलं प्रविश्य साक्षात्तज्जठरमेव प्रापुः। अजगरो मुखपिधानाय श्रीकृष्णप्रवेशमेव निरीक्षते स्म। किंतु स सर्वज्ञो झटिति तस्य कण्ठदेशे स्थित्वा महाकाय उच्चैरवर्धत। तेन कण्ठबिलं पिनद्धं क्षणेन प्राणनिरोधात्सोऽसुरो मृतः। अनन्तरं विदितासुरमाया बालास्ते श्रीकृष्णं प्राशंसन्।

## ॥ ब्रह्मशिक्षा ॥

अचिन्तनीयं हि भगवतो मायाविलसितम् ।

गोपाः तत्सङ्गाश्च जनाः तस्याद्भुतस्वरूपं भगवत्त्वं ज्ञात्वापि तत्क्षणे प्राकृताविद्यया तत्स्वरूपं विस्मृत्य व्यामुह्यन्ति । प्रज्ञावन्तः पण्डिता अपि ममताहन्तावशीभूताः निजबोधपराङ्मुखाः सन्तः पदे पदे मायाविवर्ते परिभ्राम्यन्ति । तथाहि लोककर्ता ब्रह्मापि कदाचन स्वयं प्रमादमपराधं कृतवानिति श्रूयते । स तु चतुर्मुखो भगवल्लीलादर्शनकुतूहलेन समागत आसीत् । गोपालबालकैः सार्कं सरामः श्रीकृष्णो वत्सांश्चारयति स्म । भगवतो गोपबालभूमिकां पश्यत एव ब्रह्मणश्चित्तं मोहमावृणोत् । तदा मध्याह्नसमये क्षुधितास्तृषितश्च गोपबालाः सर्वे कञ्चन मण्डलाकारेणोपविश्य स्वस्वपाथेयं परस्परविभागविनिमयादिकं कुर्वन्तः सानन्दं भुञ्जन्ति स्म। तान्विनोदान् दृष्ट्वा ब्रह्मणः किमप्याचेष्टितुं मनीषाजायत । सः तत्क्षणे मायया वत्सान्सर्वानपहृत्य निगूढं स्थापयित्वा श्रीकृष्णचिकीर्षितं परीक्षमाण आस्त । तत्सर्वं श्रीकृष्णस्यानुपदमेव निर्ज्ञातमासीत् । मायेशः सः स्वयमेव तावन्तं वत्सरूपं धृत्वान्यूनाधिकं निखिलं व्यवहारमवर्तयत् । किं से-

तस्य न कोऽप्यबुध्यत । स तु ब्रह्मा संवत्सरं यावत् परीक्ष्यापि श्रीकृष्णमाहिम्नोऽक्षयत्वं दृष्ट्वा गलिताभिमानः सन् विनीतवदेकान्ते दृष्ट्वा तं स्तुत्वा प्रसाद्य च तदनुज्ञया प्रदक्षिणं परिक्रम्य स्वस्थानाय निरगच्छदित्यतः सुदुस्तरा भगवन्मायेत्युच्यते ।

॥ धेनुकसंहारः ॥

रामकृष्णौ कदाचिद्वयस्यैः सह विहरन्तौ वने सुदूरमगच्छताम् । तत्तु तालवनं नाम धेनुकनाम्नोऽसुरस्य वासभूमिरासीत् । महामायो गर्दभरूपी स दुष्टः सकलप्राणिभक्षक आस्त यतोऽतस्तत्र शून्यप्रायमासीत् । तालवृक्षेषु तु फलानि प्रभूतान्यासन् । तद्दृष्ट्वा फललोलुपा गोपबालाः फलग्रहणाय रामकृष्णौ न्यमन्त्रयन्त । तेषां काङ्क्षायामनुज्ञातायां सत्यां रामः स्वयमग्रे गत्वा वृक्षान् भृशं कम्पयित्वा च फलान्यपातयत् । तच्छब्दं श्रुत्वासुरगर्दभः सः वेगेनागत्य यावच्चरणाभ्यां राममुरसि ताडयति तावत्स धीरो बलोऽपि तच्चरणयोर्गृहीत्वा तं गर्दभमाकाशे श्वासबन्धपर्यन्तमभ्रामयत् । गतजीवितं च तं वृक्षोपरि प्रास्यत् । अथ च सम्पतितानि पक्वतालफलानि गोपबालाः

सर्वे यथेष्टमाभक्षयन्। गोधेनवश्च तत्राभुक्तपूर्वं
नवतृणं विस्रब्धमचरन्।

## ॥ कालियदमनम् ॥

कालिन्द्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना।
श्रप्यमाणं जलं तत्र पतन्त्युपरिगाः खगाः॥

दुष्टानां प्रशासनाय किल भगवानिहावतीर्णः। कालि-
यमर्दनमनीषयैवैकदैकाकी श्रीकृष्णस्तं ह्रदमगच्छ-
त्। दृढपरिकरः सः मध्येह्रदं प्रगाह्य बाहुभ्यां जल-
मास्फोटयन् कदनसंरम्भमकरोत्। तद्रभसं
श्रुत्वैव सकोपाटोपमागतः कालियो महानागः स्व-
भोगेनावेष्ट्य श्रीकृष्णं दष्टुमारभत। अत्रान्तरे श्री
कृष्णमेवान्वेषमाणास्तत्परायणा गोपबालास्तत्रा
गत्य तदवस्थं कृष्णं दृष्ट्वा महादुःखेन रोदितुमा-
रभन्त। केचन शीघ्रमनुधाव्य नन्दादिभ्यस्तद्वार्तां
न्यवेदयन्। वज्राहता इव सर्वे ते गोपा गोप्यश्च तत्ती
रभूमिमासाद्य शोकार्णवमग्ना उच्चैः प्ररुदन्त आ-
त्मघातायैव व्यवस्यन्ति स्म। तावति बली बलरा-
मः श्रीकृष्णमुच्चैः सम्बोध्य विनोदेनालं शीघ्रं का-
लियं मर्दयेति समबोधयत्। अग्रजेन प्रोत्साहितः
श्रीकृष्णः स्वाङ्गं हठादास्फोटयामास। तेन क्षिप्त-

इन्धनः कालियो दूरे पपात। पुनरभियान्तं तं
निर्दयदमनमनीषया श्रीकृष्णः फणाग्रे गाढमुष्टिना-
पीड्यावनामयित्वा च सहसोपर्याक्रम्य तत्रोरुवि-
क्रमो नर्तितुमारभत। कुन्तकुट्टनसदृशैः पादाघातैः
क्षणेन क्षतविक्षतः कालियो रक्तमुद्वमन् मूर्च्छि-
तोऽपतत्। तदवस्थं पतिं दृष्ट्वा नागपत्न्यः-
भगवन्, त्राहि त्राहि। पतिभिक्षां देहीति सकरु-
णं प्रार्थयन्त। दयालुः श्रीकृष्णः कालियं सजी-
वममुञ्चत्। क्षणान्तरे ससंज्ञं कालियं प्रति य-
मुनां सद्यस्त्यक्त्वा सपरिवारः समुद्राय निर्गच्छे-
त्याज्ञापयत्। निगृहीतः कालियोऽपि तदाज्ञां म-
हाप्रसाद इति शिरसागृह्य तं प्रदक्षिणं परिक्रम्य
सपरिवारस्ततो निरगच्छत्। ततः स विजयी श्री
कृष्णस्तीरमभ्याजगाम। समन्दहासमभ्यायान्तं
सजीवरत्नमिव तं दृष्ट्वा सङ्क्रम्य च व्रजजनाः सर्वे
समुच्छ्वसिताः। केचन सानन्दं समालिङ्गन्। एके
आशीर्भिः समवर्धयन्। अपरे तमङ्गोपङ्गेषु समस्पृ-
शन्। अन्ये संलापेन कटाक्षेण च समभावयन्।

तदैव सामृतजला यमुना निर्विषाभवत्।
अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः॥

प्रकृत्या खलु सुन्दरं वृन्दावनं यमुनातीरं च। विशेषतस्तु श्रीमद्भगवतः संसेवनसंभावनयालौकिकीं श्रियं बिभर्ति स्म। तादृशालौकिकचारुतोत्तेजिताश्च सर्वे गोपीगोपाः क्रीडाकौतुकमनिशमसेवन्त। एवं लीलारसे विवर्धमाने कदाचित् - (श्लो॰)

क्रीडिष्यमाणस्तान् कृष्णो विलासी बलसंयुतः।
वेणुं विरणयन् गोपैर्गोधनैः संवृतोऽविशत्॥

कस्तूरीतिलकं ललाटफलके वक्षःस्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम्।
सर्वाङ्गे हरिचन्दनं च कलयन् कण्ठे च मुक्तावलिं
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः॥

वृन्दावन इत्थं सरसविनोदे प्रवृत्ते (श्लो॰)

गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः।
ईडिरे रामकृष्णौ च नटा इव नटं मुहुः॥
रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः।
कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन्॥

॥ प्रलम्बासुरवधः॥

प्रत्यहमेवं गोपबालानां लीलागोष्ठीरसेन प्रक्रीडतां मध्ये गोपरूपप्रतिच्छन्नः प्रलम्बो नामासुरः समेयाय। स च कंसभृत्यः मायया समयं प्राप्य

रामकृष्णौ हनिष्य इति मन्यते स्म । सर्वज्ञः श्रीकृष्णस्तु तस्यैव वधायोपायमारचयत् । (श्लो०)

तत्रोपहूय गोपालान् कृष्णः प्राह विहारवित् ।
हे गोपा विहरिष्यामो द्वन्द्वीभूय मिथोमिथः ॥
केचिद्बालाः कृष्णपक्ष आसन् रामस्य चापरे ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥

सन्ध्यैवं तत्र क्रीडा प्रावर्तत । ततः क्षणेन बलरामोऽजयत् । तेन पराजितो गूढवेषः स प्रलम्बः जेतारं बलं स्कन्धेनावहत् । तेन वहनव्याजेनैव सुदूरं नीत्वा तं बलं घातयिष्यामीत्यालोच्य दानवः स द्रुततरं पलायितुमारभत । तदानुजोऽग्रजस्य सङ्केतं कृत्वा दैत्यं तं निपातयेत्यसूचयत् । एवमनुजेनोत्तेजितोऽसुरस्कन्धासीनो बली बलो दृढेन मुष्टिना तन्मस्तके समकुट्टयत् । तेन तीक्ष्णप्रहारेण भिन्नमस्तिष्को दानवो रक्तमुद्वमन् सद्योऽम्रियत । (श्लो०)

दृष्ट्वा प्रलम्बं निहतं बलेन बलशालिना ।
गोपाः सुविस्मिता आसन् शशंसुः साधु साध्विति ॥

॥ दवाग्निपानम् ॥

अथैकदा गोपबालास्ते मुञ्जाटवीं गत्वा तत्र गाश्चारयन्ति स्म । यदृच्छया तत्र दवाग्निर्जातः

क्षणेन विवृद्धः परितो व्याप्तोऽभवत्। तदा सर्वे गावः गोपबालाश्च भयव्याकुला दीनाश्च रामकृष्णयोः(शरणमगाच्छन्)शरणमुपगम्य प्रार्थयन्ति स्म। (श्लो॰)

कृष्ण कृष्ण महावीर हे रामामित्रकर्षण।
दवाग्निना दह्यमानान् प्रपन्नांस्त्रातुमर्हथः॥
वचो निशम्य कृपणं बन्धूनां भगवान् हरिः।
निमीलयत मा भैष्ट लोचनानीत्यभाषत॥
तेष्वथो मीलिताक्षेषु भगवानग्निमुल्बणम्।
पीत्वा मुखेन तान् कृच्छ्राद्योगाधीशो व्यमोचयत॥

।अभिनवलीलावतारः।

रामकृष्णयोः सुभगयोः लीलाविलसितैर्नैतिजिताश्चारुहासस्संश्चपरसेनाकृष्टाश्च गोप्योऽपि क्रीडागोष्ठीं निर्विशन्ति स्म। ततः प्रवृत्ते वर्षाकालेऽपि गोपीगोपपरिवृतानां रामादीनां श्रीकृष्णमुख्यानां क्रीडाव्यतिकरोऽन्यून एवावर्तत। तदनन्तरं प्रवृत्ते प्रकृतिरम्ये शरत्काले तु नवीनोज्ज्वललीलाकौतुकभावितवान्ः श्रीकृष्णः — (श्लो॰)

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम्।

मुरलीमोहनस्तत्र वेणुगानामृतवर्षमभिप्रकार । ३३

रन्ध्रान्वेणोरधरसुधया पूरयन् गोपवृन्दैः
वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥
तदा वेणुरवं शौरेः सर्वभूतमनोहरम् ।
श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेमिरे ॥
गावो मृगाः खगा नद्यः पर्वता देवतास्तदा ।
नृत्यन्ति स्म मनुष्याश्च वेणुगीते मनोरमे ॥

॥ लोकोत्तरलीलावतारः ॥

योऽयं मायाध्यक्षो भगवन् स्वमायया विश्वमिदं सृष्ट्वा पालयित्वा संहृत्य च विहरति स एषोऽन्तर्यामी परमपुरुषः सर्वभूतान्तरात्मा । स किल कार्यगौरवात्तु मानुषरूपेणात्र भुवि अवतीर्णः । स च मायेशो यत्र भवति तत्र च मायाविलासः प्रकटितो भवतीत्येतत्स्वाभाविकमेव । ते पुनर्धन्याः ये नाम केचित्तस्य भगवतः सहचराः सन्तस्तन्महिमानुभवं साक्षात्कुर्वन्ति स्म । परमप्रेमास्पदस्य स्वान्तरात्मनस्तस्य लीलाविनोदेन को नाम सुहृदयो न नन्देत् । अत एव यज्ञपत्न्युद्धरण गोपीवस्त्रापहरणरूपेष्वपि विचेष्टितेषु न कस्यचन प्रकोपः समजायत । प्रत्युत तेषां सर्वेषां प्रीत्यानन्द

एवाभवत्। तदेतैः श्रीकृष्णस्याद्भुतैः कर्मभिस्त-
था वरुणापहृतनन्दप्रत्यानयनादिना दिव्यकर्म-
णा च भगवल्लीलामात्रं प्रकटितमिति मन्तव्यम्।

॥ शक्रगर्वभङ्गः ॥

शरत्काले गोकुलस्थाः प्रतिवर्षं शक्रप्रीतये म-
हान्तमुत्सवं कुर्वन्ति स्म। तदा नन्दकुमारः प्रसक्तं
तमुत्सवं प्रतिषिध्य गोपैर्गिरियज्ञो गोपूजोत्सवः प्र-
कर्तव्य इति बोधयाञ्चकार। तद्वचनं सयुक्तिकम-
नुमन्यमानाः सर्वे गोपीगोपा इन्द्रोत्सवं विहाय गिरि-
यज्ञं गोपूजनं चाभूतपूर्वेण सम्भ्रमेण प्रावर्तयन्।

अथ विदितवृत्तान्त इन्द्रः स्वावमाननं मत्वा
प्रकुपितोऽभवत्। क्रुद्धस्य विवेको लुप्यते किल।
अतः स भगवन्महिमानं विस्मृत्याभिमानोन्मत्तः
सन् गोकुलसर्वनाशमचिन्तयत्। सः संवर्तकसं-
ज्ञान् कालमेघानाहूय प्रभूतवृष्ट्या गोकुलं प्रपीड-
यतेत्यादिशत्। तदाज्ञया च घनघोरास्ते संवर्तकाः
क्षणेन गोकुलस्योपरि निबिडिता आसन्। घनान्ध-
कार आवृते चक्रवाताश्चण्डवाता अमूर्च्छन्। उ-
पर्युपरि घनगर्जितैर्विद्युत्प्रचारैर्वज्रपातैश्च ब्र-
ह्माण्डं स्फुटतीव प्रक्षोभः समजायत। अनुपदमेव

महामात्रैर्जलबिन्दुभिर्घोरतरा वृष्टिर्धारासारेव पतितुमारभत। प्रवातप्रवृष्टिरभसेन पार्श्वयोर्-ध्र्वमधश्च सर्वत्र जलमये जाते गोधेनवो गोपीगोपाश्चा-तीवार्ततरा अभवन्। सहसोपनतं दुस्सहमुपप्लवं विभाव्यैव श्रीकृष्णोऽबुध्यत सर्वमिदं शक्रकृतं दुश्चेष्टि-तमिति। अतः स स्वकीयानां रक्षणाय कृतमतिः सद्यः स्वर्चितं गोवर्धनमेवोत्पाट्य गोकुलस्योपरि पृथु-च्छत्रमिव तमधारयत्। तदधः संश्रिता गावो गोपाश्च सर्वे निरातङ्काः सुखेनातिष्ठन्। एवं सप्त-वासरमहोरात्रमविरतप्रवर्षणेऽपि गोकुलस्य सु-स्थतां विबुध्य देवेन्द्रो हताशः सन् गर्वमत्यजत्। तान् कालमेघांश्च ततोऽपासारयत्। अथो वृष्ट्या-डम्बरे प्रशान्ते गिरिधारी च तं गोवर्धनं स्वस्था-ने यथापूर्वमस्थापयत्। ततो गोपा अपि पुनर्वस-तिं विधाय पूर्ववत्सुस्था बभूवुः। कृतव्यलीकश्च श-क्रः स्मृतपरमार्थः सन् श्रीकृष्णप्रसादनाय गोमा-तरं कामधेनुं पुरस्कृत्यैकान्ते गिरिधरश्रीनामा-नं प्रणिपत्य क्षमां याचते स्म। तदनु सुरभिरपि जय गोपाल, जयजय गोविन्देति स्तुवन्ती तुभ्यं मया शक्रेण च क्रियमाणं गवेन्द्रपट्टाभिषेकं प्रीत्या स्वी-

कृत्य धन्यतामनुगृहाणेति तं प्रार्थयत। दयालुः स गोपालचक्रवर्ती तयोस्तथास्त्विति काममपूरयत्। ततश्च गवेन्द्रानुज्ञातौ सुरभिपुरन्दरौ प्रदक्षिणं परिक्रम्य स्वस्थानाय निरगच्छताम्।

तेनाद्भुतेन गिरिधारणकर्मणा भगवन्निजस्वरूपं बुध्वापि सर्वे गोपीगोपा अनुपदं मायामोहिताः सन्तः तं गिरिधरं नन्दकिशोरमात्रं मन्यन्ते स्म। एवंच तौ सङ्कर्षणवासुदेवौ सामान्यैरसामान्यैश्च दिव्य लीलाभिः सर्वमानसानन्दकरौ सन्तौ क्रमेण कौमार वयसावभवताम्। तदा तु श्रीकृष्णो गोपाङ्गनानां विशेषतः प्रेमकल्लोल्लासको भूत्वा मनोरमणोऽभवत्। तथा हि सूरयो वर्णयन्ति। (श्लो॰)

प्रातर्व्रजाद् व्रजत आविशतश्च सायं
गोभिः समं क्वणयतोऽस्य निशम्य वेणुम्।
निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः
पश्यन्ति सस्मितमुखं सदयावलोकम्॥

॥ रासलीलाप्रसङ्गः॥

ततःपरं निसर्गरमणीयः शरत्कालः समवतीर्णः। निर्मलं व्योम। सरितः प्रसन्नाः। विमलानि सरांसि विकस्वराभिः पद्मिनीभिः समलङ्कृतानि।

वृन्दावनं समन्तात् काननमपि पुष्पैर्विविधैर्विभूषि-
तम् । सुमन्दमनोहरो वायुः प्रचरन् पुष्पसौगन्ध्यं
सर्वतः प्रसारयन् शीतसुखस्पर्शमापादयति स्म । स-
न्ध्यामुखं त्वतीवरम्यमासीत् । गगनारविन्दमि
व धवलमन्दहासमुद्गिरंश्चन्द्रो निशामुखं समु-
द्योतयति स्म । एतादृशे परमरमणीये काले स्वा-
त्मारामोऽपि स्वानुरक्ता व्रजस्त्रियो रमयितुमिच्छ-
न् श्रीकृष्णो वृन्दावनकुञ्जे संमोहनं नामान्व-
र्थं वेणुं वादयितुमारभत । कर्णयोरमृतायमा-
ने मुरलीगाने समुज्जृम्भमाणे सति सर्वे व्रजौकसो
भावपारवश्येन तरङ्गिता अभवन् । गोपिकास्तु याः
पूर्वमेव कृष्णावेशितभावास्ताः सर्वाः अनुरागमहा-
पूरोह्यमाना इव सर्वं स्वकर्म विस्मृत्य प्राचलन् ।
तत्काले याः काश्चित् स्त्रियो दुहन्ति मथ्नन्ति प-
चन्ति रन्ध्यन्ति परिवेषयन्ति भुञ्जन्ति भोज-
यन्ति पिबन्ति पाययन्ति सेवन्तेऽन्वासते वा
सह कुर्वन्ति वालङ्कुर्वन्ति वा तास्ताः सर्वा युव
तयस्त्यक्त्वा स्वकर्म तथैव निरगच्छन् । भगवन्मा-
यया तु गृहजनास्ताः गृहस्थिता इत्येव मन्यन्ते स्म ।
तत्र वृन्दावने श्रीकृष्णं परितः क्षणेनैव महान्महिला

समाजः समभिलत्। प्रेमनिर्भराभिर्युवतिभिः साक्षा-
द्योगमायेशेन स्वयमवतारिते शृङ्गारे विषये को
नाम वर्णनाय क्षमेत । भगवान् किल तावन्त्येव
रूपाणि धृत्वा सर्वास्ताः प्रमदाः सममरमयदिति
कविभिर्वर्णितः स उज्ज्वलो रासोत्सवः ।

॥ गोपीनां करुणगाथा ॥

उत्तरोत्तरं संवर्धते स्म रासक्रीडा । तत्रैकैक-
स्या वनितायाः स्वसङ्गत एव श्रीकृष्ण इति मति-
रासीत् । अतश्च सर्वास्ताः स्वस्वसौभाग्यमेव गो-
विन्दमोदावहमित्यभिमन्यन्ते स्म । तदैव किल
सर्वज्ञः श्रीकृष्णः सहसान्तर्हितोऽभवत् । तदा तु
रमणमपश्यतीनां दिङ्मूढ स्त्रीणां दौस्थ्यं परमकरुणम-
वर्तत । भयं शोको नैराश्यं व्यग्रता वैक्लव्यं सम्भ्र-
म इत्यनेकभावानुभावतरङ्गितान्तरङ्गाः प्रम-
दास्ताः प्रत्येकशो पृथक्शश्चाहमहमिकया च तं कान्तं
यत्र तत्र पर्यमार्गयन् । परं तु न दृश्यते स्म
स मायी दूरेऽन्तिके वा कुञ्जे मण्डपे वा वृक्षे वृ-
क्षान्तरे वा । अथ पदचिह्नमन्वीक्ष्य श्रीकृष्णमेवा-
न्वेषमाणाः परस्परं च तद्गुतं तच्चरितं संलपन्त्यो
वर्णयन्त्यो गायन्त्योऽभिनयन्त्योऽनुकुर्वन्त्यः प्रेम

निर्भरास्ताः पुरस्थं चेतनमचेतनमविशेषेण श्री
कृष्णगतमेव परिपृच्छन्ति स्म । सर्वात्मना च कृष्णैक-
तानहृदयास्तत्प्राणास्तन्मयाश्च सर्वं कृष्णप्रायमेव
मन्वानाः सर्वत्र परिमृग्यापि तमलब्ध्वा क्रमाद्यमुना
तीरभूमिमवापुः । तत्रापि पुलिने वा जले वा स्वकान्तं
विचित्याप्यलब्ध्वा चूर्णिताभिमानाः सर्वास्ताः परिवार्य
गाढशोकवैक्लव्येन श्रीकृष्णं प्रत्येव तच्चरितमुच्चै-
र्गातुमारभन्त । तत् प्रेमकरुणोज्ज्वलं गोपीगीतं नाम प्रबन्ध-
रत्नं ऋषिनिबद्धं भावुकाः स्वयं परिशीलयन्तुतराम् ।
ततश्च तासां प्रणयगाथाभिः करुणाक्रन्दितेन च द-
यालुः प्रसन्नस्तासां मनःकान्तः पुरस्तात् प्रादुरा-
सीत् । तं च मनोरमणं साक्षान्मथमन्मथं पीताम्ब-
रं स्रग्विणं स्मयमानमुखाम्बुजं वीक्ष्य स्त्रियस्ताः
प्रत्यागतप्राणा इव ससम्भ्रमं तं पर्यवारयन् ।

॥ रासक्रीडा ॥

वनितोपलालनपटुर्गोविन्दः प्रमदास्ता यथो-
चितं हासचेष्टावलोकनैः प्रणयोपचारैश्च पर्यसान्त्व-
यत् । तास्तु कामिन्योऽद्याप्यपरिपूर्णकामा इतीद-
मालक्ष्य स भगवान् शृङ्गारशेखरः पुनर्विरच्या-
त्मारामो रासगोष्ठीम् रीरमत रमयति स्म ताश्च गोपिकाः । ली-

लानायको) जगन्नाटकसूत्रधारो लीलानायको मो-
हनं वेणुं वादयति । दिव्यं सङ्गीतं गायति । यमुनां
स्तौति । वृन्दावनं वर्णयति । चन्द्रमसमुपश्लोकयति ।
[आविष्करोति] [गोनामर्त]
साक्षान्मूर्तमिव शृङ्गाररसमभिवर्षति । गोप्यस्तु
वृन्दारकतरुणीरतिक्रम्य कृष्णनामैव केवलं गो-
विन्देति ध्रुवपदं कुर्वन्त्यः सविलासहासं सतालंच
प्रनृत्यन्ति स्म। इत्थं चाभिरमिता ता गोपवनिताः
श्रीकृष्णे सर्वात्मनावेशितभावास्तथैव तदन्तर्यामि-
नात्मस्वरूपेण गोविन्देनाभिगम्य भूयोभूयो यामि-
नीषु रासगोष्ठीं निर्विशन्ति स्मेत्येष रसवल्र-
सङ्गो महाकविवर्णितः। स तु रसिकैस्तत्रैव बाढं
परिशीलनीयो भवेत् ।

॥ महिमा (विक्रम) प्रकाशः ॥

कदाचिन्नन्दादयो गोपा अम्बिकावनेऽ-
म्बिकापतिसेवां कृत्वा तत्रैव विश्राम्यन्ति स्म ।
रात्रौ कश्चिदजगर आगत्य निद्रितं नन्दं गृ-
हीत्वा ग्रसते स्म । सर्वज्ञः श्रीकृष्णस्तमजगरं प-
दास्पृशत् । तत्क्षणे स शापदोषान्मुक्तो विद्याध-
रो भूत्वानुज्ञातश्च प्रदक्षिणं परिक्रम्य स्वस्थाना-
य निरगच्छत् ।

अन्यदा वनान्तरे गोपिकास्त्रीभिः सार्कं विहारसौख्यं निर्विशतो रामकृष्णयोः पश्यतोः शङ्खचूडो नाम दृप्तो यक्षः स्त्रियोऽपहरतिस्म। तदा श्रीकृष्णस्तरसा नियुद्धेन तं यक्षं निगृह्य तच्छिरोरत्नमुत्पाट्य च तत् प्रादादग्रजाय।

अपरस्मिन् दिनेऽरिष्टो नाम महामायः कंसभृत्योऽसुरो बालजनजिघांसया वृषभरूपं धृत्वा गोकुलमभ्यायात्। तस्य च विचेष्टितैः सर्वे भयोद्विग्ना आसन्। ज्ञातवृत्त एव श्रीकृष्णः सहसागत्य तमभियुध्य चामारयत्।

एवंप्रकारैर्लीलाभिर्भगवान् दुष्टदनुजानवमर्द्य स्वगृह्यान् गोकुलगोपालान् परिपालयति स्म। गुणशीलप्रज्ञापराक्रमादिभिस्तथा दिव्यचेष्टाविशेषैश्च सर्वहृदयानन्दनश्च बभूव॥

॥कंसचिन्ता॥

त्वयान्विष्य मम शत्रुर्निहन्तव्य इत्यादिश्य कंसो मथुरातो दिने दिने स्वभृत्येष्वेकैकं दनुजं प्रेषयति स्म। तं तमसुरं श्रीकृष्ण आसाद्य यमसदनायैव प्रेषयति स्म। [redacted]स्य वार्तावेदकोऽन कश्चनासीत्। अतश्च सोऽधिकं पर्याकुलोऽभवत्। मृत्यु-

भयेनातीव कातर एवास्त। एकदा च नारदमुखात्स
रामकृष्णयोर्जन्मवयोऽवस्थादिकं सर्वं श्रुत्वा सद्यः
कोपोन्मत्तः सन् देवकीवसुदेवयोः प्रपीडनाय पुनः
तौ शृङ्खलादिभिर्बन्धयित्वा कारायामस्थापयत्।
किं च केशिनामकं महामायासुरं प्रति त्वं हयस्वरूपे-
णासाद्य गोकुलं ममाहितौ रामकृष्णौ जहीत्याज्ञाप-
यत्। तथाज्ञप्तश्च सोऽसुरावो गोकुलमागत्य सकल
सत्वभयङ्करं युद्धाटोपं प्रकरोति स्म। विदित
वृत्तोऽथ श्रीकृष्णस्तं दुरासदं दैतेयाश्वं तरसा-
भियुध्य न्यषूदयत्। अथ च कतिपयदिनान्तरे
कंसाज्ञप्तो व्योमो नामासुरो गोपवेषप्रतिच्छन्नः
प्रक्रीडतां गोपबालानां समाजे प्रविश्य मायया बाला-
नपहृत्य क्वापि गुहायां प्रक्षिपति स्म। क्षणेनैतज्
ज्ञात्वा यशोदानन्दनस्तमसुरमभिगृह्यामारयत्।
एवं पदे पदे लोककण्टकानामर्दयन् सबन्धूनभिरक्षन्
सर्वेषां च प्रमोदमावहन् विजयते स्म श्रीकृष्णः॥

॥ अक्रूरागमनम् ॥

स्वाभियोगं सकलं निष्फलमभिवीक्ष्य कंसः
शत्रुनाशाय पुनर्मनस्युपायान्तरमचिन्तयत्। राज्यस-
चिवेष्वेकतममक्रूरनामानं महाशयमाहूयैवमादि-

देश। आर्य, त्वं खलु प्रभुहितैषी योग्यश्च। त्वया ममैकं मुख्यं कार्यं साधनीयम्। नन्दस्याश्रये गोकुले मम भागिनेयौ स्त इति श्रुतम्। अत्रास्माभिर्धनुर्यागः प्रवर्त्यते। एतदुत्सवाह्वानं निवेद्य तौ बालकौ त्वं शीघ्रमिहानय। इत्याज्ञप्तः सोऽक्रूरो बाढमिति प्राचलत्। रथं सन्नह्य प्रस्थितः सत्स्वभावः सः कदा नु श्रीभगवतः किशोराकृतिं द्रक्ष्यामीत्युत्सुक एव गोकुलमाययौ। अभ्यागतमाप्तबन्धुं तं वीक्ष्य रोहिणीत्याद्या नन्दादयश्च सर्वे मधुरास्थानां वसुदेवदेवकीप्रभृतीनां कौशलपरिप्रश्नैः प्रमुदिता अभवन्। किंच तेन कथितं देवकीपुत्रः श्रीकृष्ण इतीदं श्रुत्वा सर्वेऽतीव विस्मिताः प्रमुदिताश्चासन्। भगवन्मायामहिमानं श्रुत्वा बुध्वापि तदुत्तरक्षणे तस्यैव सगुणसाकारश्रीरूपप्रभावेण तिरोभूतज्ञानास्ते सर्वे नन्दादयो व्यामुह्यन्ति स्म। अथोऽक्रूरः सर्वेषां समक्षं स्वागमनकारणं राजाज्ञां चन्यवेदयत्। तदन्वमन्येतां रामकृष्णौ हर्षेण। ततश्च बन्धूननुमन्त्र्य तौ रुचिराकल्पौ रथमारोहताम्। अत्रान्तरे गोपिकाः श्रीकृष्णप्रयाणं बुध्वोद्विग्नाः प्रेमभरमन्थराश्च तं गोविन्दं मार्गमध्य आगत्य मास्मान् परित्यजेति बहुभ्यर्थ-

यन्ति स्म। पुनरचिरेण समागमिष्याव इति ताः कथ-
ञ्चिदाश्वास्य तौ प्रयाणं कृत्वा मधुरानगरद्वारं प्रापतुः।
प्रयाणमध्येऽक्रूरः श्रीकृष्णस्य भगवत्त्वं विश्वरूपत्वं च
साक्षाद् बुध्वा तत्साहचर्येणात्मानं धन्यममन्यत। ततः
स श्रीकृष्णनिर्देशेनाग्रतो राजभवनमेको गत्वा कंसाय
रामकृष्णागमनं विज्ञाप्य स्वमन्दिरं प्राप। कंसोऽपि
स्वाभ्यागतं शत्रुं स्ववशं मत्वा तन्नाशाय स्वाश्रितान्
मल्लपुरुषानाज्ञापयति स्म।

मधुराप्रवेशः

इतश्चाग्रजेन साकं पुरं प्रविशन् श्रीकृष्णो मार्गे
राजकीयं रजकं दृष्ट्वा त्वद्वस्त्रस्य साकल्यमस्मभ्यं
दातुमर्हसीत्यादिशत्। स तु मन्दस्तदनुरोधं
यदा तिरश्चकार तदैव तत्राध्वंसत। पुनश्च तौ
देववर्चसौ मालाकाररङ्गकारसमीपं गत्वा तद्दत्तं
पुष्पगन्धानुलेपादिकं गृहीत्वा तदेतैः प्रसाधनैः
स्वमलङ्कृत्य साक्षाद्देवकुमाराविव श्रीरूपगुणावि-
द्योतमानौ राजमार्गे प्राचलताम्। तदैतयोराग-
मनवार्तां विदित्वा नागराः पुरुषाः स्त्रियो वृद्धा
बालाः सर्वेऽपि दिदृक्षयाहमहमिकया उत्सुत्योत्सु परिपश्यन्ति
स्म। अहो इदं तद्गोपवनिताविभ्रमावहं श्रीरूपसौ-
भाग्यमिति मत्वा दृष्ट्वा च नयनोत्सवमन्वभवन्।

स्वलीलाञ्चितगमनेन राजमार्गमलङ्कुर्वाणौ तौ रामकेशवौ क्रमेण तत् स्थानं प्राप्नुतां यत्र स्थापितं महद्धनुः स्वर्चितं च । तत्र च धनुषो दर्शनं कृत्वा रक्षिभिः प्रतिषेधितोऽपि श्रीकृष्णस्तद्धनुः करेणादायावनामयित्वा च ज्यारोपणव्याजेन तद्भञ्जनयत्।

(श्लो०) तयोस्तदद्भुतं वीर्यं निशाम्य पुरवासिनः।
तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ ॥

तावति काले सूर्योऽस्तं गतः। तदा तौ कचनाश्रये विश्रान्तिं निर्विशन्तौ निशामत्यवाहयताम् ।

इतस्तु कंसो रामकृष्णयोः सर्वं साहसमयं कर्म श्रुत्वा भयोद्विग्नः सन् रात्रौ न सुखनिद्रामलभत। दुःस्वप्नान्यपशकुनानि च दृष्ट्वा क्षणेक्षणेऽतीव पर्याकुलोऽभवत् । अथ प्रभातकाले पूर्वसूचनानुरोधेन राजसभाङ्गणे मल्ले रङ्गभूमिः पर्यकल्प्यत । भवनस्य प्राङ्गणे बहिश्च कुवल्यापीडो नाम महागजः सज्जीकृतोऽस्थाप्यत । एवं पदे पदे रामकृष्णप्रतिघाताय व्यवस्थां कृत्वा तां मल्लरङ्गवार्तां राजकीयाः पुरुषाः पुरे सर्वत्र समघोषयन् । अथ रङ्गकौतुकादिदृक्षवः पौरा जानपदाश्च जना यूथश आगत्य निरन्तर

सम्मर्दैनैकत्र समभिलन्। अथ मल्लपुरुषाः
रङ्गपूजां विधाय तूर्याणि दुन्दुभिमुख्यान्यवाद-
यन्। एवं नानाध्वनिभिः शब्दायमाने नभोऽव-
कारो कंसः सामात्यपरिवार आगत्य परिष्कृते
राजमञ्चे समुपाविशत्। ततो मल्ला यूथशो
रङ्गमवगाह्य क्ष्वेडन्तो नर्दन्तो भुजास्फलनं च
प्रकुर्वन्तो विनोदं प्रदर्शयितुमारभन्त। तत्र च
चाणूरो मुष्टिकः कूटः शल इत्यादयो महामात्रा
मल्लाः सपरिष्कारा द्वन्द्वं नियुद्धं प्रदर्शयन्ति स्म।
कंसवधः
तावति काले श्रुततूर्यध्वनी रामकेशवौ ससम्भ्रमं प्रा-
तः कर्तव्यान्यनुष्ठाय सोत्साहं रङ्गभूमिमुद्दिश्य प्राति-
ष्ठेताम्। रङ्गद्वारदेशे कंसाज्ञयाम्बष्ठो नाम हास्ति-
पकः रामकृष्णप्रवेशमेव प्रतिपालयति स्म। यदा
रामकृष्णौ तत्र प्रविष्टौ तत्क्षणे स हास्तिपकस्तं
मदोत्कटं कुवलयापीडं तयोरुपरि प्रैरयत्। म-
हामात्रेणाङ्कुशपादघातादिभिः प्रणोदितःस मत्तगजः
सहसा श्रीकृष्णमभ्यद्रवत्। योऽयं बलवतां स्वय-
मन्तरात्मा सोऽसौ श्रीकृष्णस्तं गजमभियुध्यन्
नातिसम्भ्रमेणैव कौशलचमत्कारेण तस्य शुण्डा-
दण्डं प्रपीड्याकुञ्चयित्वा चापीडयत्। तेन सम्म-

र्दैनातितरां विषण्णः स गजो धरातले पपातोत्तान शायी। पतितस्य तस्य तौ दन्तमुभावप्येकमेकं तरसोत्पाट्य तं हत्वा हास्तिपकं तमन्यांश्च रक्षिणः परलोकं प्रापयताम्। क्षणेनैवमद्भुतं साहसं कृत्वा रामेण साकं श्रीकृष्णो रङ्गभूमिमभ्याययौ। (श्लो॰)

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोःशिशुः।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः॥

निरीक्ष्य तावुत्तमपूरुषौ जना
मञ्चस्थिता नागरराष्ट्रका भृशम्।
प्रहर्षवेगोत्कलिकेक्षणाननाः
पपुर्न तृप्ता नयनैस्तदाननम्॥

महामना अपि कंसस्तौ सहसा प्रविष्टावभिवीक्ष्य क्रोधादुद्वेगाच्च दिङ्मूढोऽवातिष्ठत्। तदा दृप्तमल्लश्चाणूरस्तौ निष्ठुराक्षरैर्निन्दन् नियुद्धायाह्वयत्। सज्जौ च तौ दृष्ट्वा सभायां जनाः बालयोर्बलिनोरसमः समागम इति किलकिलारवं चक्रुः। अथापि राजाज्ञया चाणूरः श्रीकृष्णमभ्ययुध्यत बलरामं च मुष्टिकः। तावपि रामकृष्णौ क्षणं मन्दं

क्षणं सलिलं क्षणे सवेगं क्षणेन सरभसमिति च
मल्लयुद्धप्रकारान् प्रदर्शयित्वान्यूनमभियुध्योभा-
वप्युभौ मल्लौ भूमौ पातयित्वा मर्माघातैर्न्यषूदय-
ताम् । रङ्गे सर्वत्र प्रशंसावाक्यैः सह कोलाहलः प्रा-
वर्तत । अथ शलतोशलौ मल्लौ तयोरुपर्युदपत-
ताम् । ताभ्यां तयोर्मारितयोः सतोः पुनः कूटकेवटौ
क्षणेन लीलयैव परलोकं प्रापितौ । ततश्चावशिष्टा
मल्ला किलकिलाशब्दं कुर्वन्तः प्राणभयाद्बहिः
प्राद्रवन् । तदा समन्ततो रङ्गे तूर्यैः सह राम-
कृष्णयोः साधुवादो जयशब्दश्च मुखरितोऽभवत् ।
दिङ्मूढः कंसो मृत्युभयादनवस्थितो मञ्चादन-
वतरन्नेव गृह्यतां वध्यतामिति बहु विकत्थते स्म ।
तं तदवस्थं दृष्ट्वा जनार्दनः सिंहगतिर्मञ्चमु-
त्पत्य मातङ्गमिव कंसं तरसा केशेष्वाकृष्याधोऽ-
पातयत् । अवाङ्मुखं निपतितः सोयावदुत्तिष्ठति
तावन्मल्लहस्तकौशलं प्रदर्शयन् श्रीकृष्णस्तस्य
कण्ठपीठभवमर्द्योत्तानमपातयत् । तथापतितं
च तं मुष्टिजानुघातैर्गतजीवितमेवामुञ्चत् । ततः
कोपादापततः कंसानुजान् सर्वान् बलरामो लील-
यैव यमालयं प्रेषयत् । ततो दिवि देवदुन्दुभयो

विन्दुः। तूर्यध्वनिरभवत्। हृष्टा देवाः पुष्पवृष्टिभिः समभावयन्। लोककण्टकनिपातेन जनाः प्रमुदिताः प्रनृत्यन्तो जयजयशब्दैरघोषयन्। क्षणमेवं सम्भ्रममनुभूय तौ लीलामानुषौ रामकृष्णौ कारागृहान्तिकमगच्छताम्। तत्र मातापितरौ मोचयित्वा तयोः सविनयं पादाभिवन्दनमकुरुताम्। तदा च तयोर्मातापित्रोरितयोः कुमारयोश्च यादृगुपगूहनसान्त्वनादिकं वृत्तं तद्यथावद्वर्णने कस्य वा शक्तिः स्यात्? इत्थं च सर्वे प्रमुदिता अभवन्। तत उग्रसेनं च बन्धनान्मोचयित्वा पुनस्तमेव राजपदस्थं चकार वासुदेवः। एवं राज्ये सुस्थे रामकृष्णयोश्चालम्बनेन ततः प्रभृति भोजयादवकुलानि श्रीसत्सन्तानसौभाग्यसमृद्धिभिः परमां वृद्धिमीयुः। सुभिक्षेण च राष्ट्रं रराज।

॥ संस्कृतिस्पर्शः ॥

अथ कालकार्यज्ञो वसुदेवः पुत्रयो रामकृष्णयोरुपनयनाख्यं द्विजातिसंस्कारं विधिवद्विधाय तौ गुरुकुलं प्रैषयत्। अवन्तीपुरे सान्दीपनिसकाशे विनयप्रश्रितौ गुरुकुलवासमकुरुताम्। सर्वज्ञावपि तौ लोकरीतिमनुवर्तमानौ देवद्विजगुरु

शुश्रूषासक्तौ भूत्वा गुरोः सकाशात् सर्वा विद्या
अशृणुताम्। सरहस्यं धनुर्वेदमशिक्षेताम्। तत-
श्चतुष्षष्ट्यहोभिः सर्वाः कला अगृह्णीताम्। सकृ-
च्छ्रवणमात्रेण वेदवेदाङ्गानामध्ययनधारणादि-
कं तयोरालक्ष्य प्राज्ञः स सान्दीपनिर्भगवत्त्वं
ज्ञात्वा जगद्गुरुगुरुमात्मानं धन्यममन्यत।
अथ गुरुकुलवासे समाप्ते स गुरुर्दक्षिणात्वेन
पूर्वमृतं स्वपुत्रं पुनरानीय प्रदत्तमिति शशंस।
ओमिति प्रस्थितौ तौ दिव्यशिष्यौ साक्षात्संयमि-
नीं गत्वा यमराजमपश्यताम्। तयोर्दर्शनक्षण
एव तत्स्वरूपज्ञो धर्मराजः सत्कारपूर्वकमर्प-
यामास तद्गुरुपुत्रम्। तं पुनरानीय गुरुस-
न्निधावर्पयित्वा तौ गुरुमभ्यवादयेताम्। पूर्ण
मनोरथः सन्तुष्टश्च स गुरुः परमाशिषाभि-
नन्द्य तौ स्वगृहगमनायान्वमन्यत। गुर्वनुज्ञा-
तौ च तौ पुनरागत्य मातापितरौ नित्यमाशिश्रियेताम्।
कदाचिदुद्धवनामानं स्वबन्धुं सन्देशैः सह श्रीकृष्णो
गोकुलं प्रेषयित्वा तत्रत्यानां बन्धूनां प्रियाणां च
योगक्षेमादिकं तदानीतं सकलं समाकर्णयत्।
यथा पूर्वं गोकुले तथैव मधुरायामपि तौ राम

कृष्णौ सुरूपगुणशीलव्यवहारैः प्रज्ञापराक्रमैश्च निखिलजनानन्दकरौ बभूवतुः। विशेषतश्च श्रीकृष्णः।

॥ भरतकुलसम्पर्कः ॥

श्रीकृष्णस्यैका पितृष्वसा कुन्तीति किल पूर्वोक्तम्। सा किल बाल्ये स्वगृहागतं दुर्वाससं महर्षिं सत्कारसेवादिभिः परिचर्यातोषयत्। तदा सन्तुष्टोऽसौ मुनिः किल तस्यै मन्त्रं देवांशसन्तानकरमुपदिदेश। ऋषौ निर्गते सा मन्त्रशक्तिं परीक्षे इति मन्वाना गङ्गातटं गता भगवन्तं सूर्यमुद्दिश्य तमेव मन्त्रमजपत्। मन्त्राह्वानोपस्थितश्च सूर्यः आत्मतेजसं पुत्रमनुगृह्य तस्यै पुनः कन्यात्वं चाशास्य तिरोऽभवत्। अथ कर्णकुण्डलालङ्कृतः कर्णनामा समभवत्। तदा हर्षचिन्ताभिव्याप्ता कर्तव्यविमूढा लोकापवादभीता च कुन्ती तं नवजातं शिशुं गङ्गायां निक्षिप्य गृहमगच्छत्। चिरायुः स तु बालो जले प्लवमानः कियद्दूरे स्नास्यतोऽधिरथनाम्नः सूतस्य हस्तागतोऽभवत्। सोऽधिरथस्तं प्राप्यानपत्यस्यात्मनो दैवदत्तः पुत्र इति हृष्टस्तं कर्णं प्रीत्या समपोषयत्। इतः कुन्त्यपि सूर्यवरेणाखण्डितकन्यावस्थैव तस्थौ। ततः कालान्तरे तां

अत्रान्तरे मद्रराजपुत्रीं माद्रीं च विवाहेन सम्प्राप्य सः
११ ताभ्यां कुन्तीमाद्रीभ्यां भार्याभ्यां सह सुखेन कालमनयत्।

वयस्थामुपयेमे पाण्डुरिति पूर्वमेवोक्तम्। अग्रजो धृतराष्ट्रो जन्मान्ध इत्यत अनुजः पाण्डुरेव हस्तिपुरे राज्यधुरं वहति स्म। स कदाचिन्मृगयाकाले मृगमिथुनेऽपराद्धः शप्तश्च तद्रूपधारिणा मुनिना "कान्तासमागमान्तं त्वदायुष्यमिति। ततः स वैरस्यं प्राप्य कुन्त्या पत्न्या प्रियया माद्र्या च साकं वनमेवाश्रयत।

तस्मिन् कुले भीष्मः पितामहः। सः अनूढः ब्रह्मचर्यव्रतधर एवासीत्। विदुरो नाम कुलजातः पाण्डुधृतराष्ट्रयोः पितृव्यः। सः राजसभायां सचिवश्च इत्थं च हस्तिपुरे राज्यप्रशासनं निष्प्रत्यूहमवर्तत।

धृतराष्ट्रस्य पत्नी गान्धारी। तयोरपि दम्पत्योः चिरं नासीत् पुत्रसन्तानः। पाण्डोस्तु मुनिशापेन पुत्रोत्पत्तियोग एव प्रतिबद्ध आसीत्। एवं च वंशविच्छित्तिमनुचिन्त्य शोचन्तं स्वपतिं पाण्डुं प्रति कुन्ती स्वबाल्यवृत्तं दुर्वासोदत्तं तद्दत्तं मन्त्रोपदेशं च निवेद्य तन्मन्त्रमहिम्ना स्वपुत्रावाप्तिमनुजानीहीत्ययाचत। तदा स पाण्डुः निमज्जतोऽवलम्बजलाभ इति तां अभिनन्द्य देवांशेन स्ववंशाभिवृद्धिमन्वजानात्। ततश्च सा साध्वी प्रथमं धर्मदेवं मन्त्रं जप्त्वाह्वयत्।

तस्माद्वरपुत्रमलभत। तं पुत्रं युधिष्ठिरनाम्नाह्वयन्।
इतः हस्तिपुरे धृतराष्ट्रः पाण्डोः पुत्राप्तिं श्रुत्वा
आत्मनश्च सन्तानमभीप्समानः कदाचित् गृहागता
त् व्यासमहर्षेः सकाशात् वररूपेण पुत्राणां शतमेकां
च कन्यामप्तवान्। द्वितीयवर्षे कुन्ती वायुदेवसका-
शात् भीमसेनं पुत्रं अथ तृतीये वर्षे इन्द्रांशजातं
अर्जुनं चालभत। अथ माद्री पत्युरनुमत्या सप-
त्न्युपदिष्टेन मन्त्रेणाहूताभ्यामश्विभ्यां यमलौ नकुल
सहदेवनामानौ पुत्रावलभत। इत्थं च पाण्डोः पञ्च
पुत्रा जनिताः। एवं पत्तने धृतराष्ट्रः कुरुराजकुमारै
कौरवैः सार्धं वनाश्रमे पाण्डुः पञ्चभिः पाण्डवैः सह
कतिचिद्दिनानि सुखेनावसत्। अथैकदा प्रियां
माद्रीं वीक्ष्य प्रणयोत्तेजितः सन् तया सङ्गम्यमान एव
तत्क्षणे शापदोषात् पञ्चत्वं गतः। तदा माद्री सहगा-
मनविधिना पतिमनुजगाम। ततो निराश्रयां कुन्तीं
तत्पुत्रैः सार्धं मुनयः हस्तिपुरे राजकुलं
प्रापयन्। एवं मिलितेषु राजकुमारेषु बाल
केलीरनुभवत्सु सत्सु ततः प्रभृति युधिष्ठिरादिभ्य
पाण्डवेभ्यः दुर्योधनादयो धार्तराष्ट्राः असूयितु
मारभन्त। पितामहस्य भीष्मस्य तथा पितृव्यस्य

विदुरस्य च प्रश्रयेण परं कुन्ती पाण्डवाश्च तत्र वसन्ति स्म । अथापि पापाः कौरवाः कदा किं द्रोह माचरेयुरिति तेषां भीतिरेवासीत् ।

इत्येवं शत्रुमध्ये निवासिनां स्वपैतृष्वस्रेयानां पाण्डवानां उदन्तं विशेषतो जिज्ञासुः श्रीकृष्णः एकदाक्रूरनामानं सचिवं पाण्डवोदन्ताहरणाय आदिश्य हास्तिनपुरं प्रैषयत् । स च तत्र गत्वा निखिलं कौरवकुलोदन्तं पाण्डवेषु धृतराष्ट्रस्य कौरवाणां च द्रोहबुद्धिं विज्ञाय मथुरां प्रतिनिवृत्तः श्रीकृष्णाय सर्वं वृत्तं च न्यवेदयत् ।

॥ वैरिभिरभियोगः ॥

कंसमरणेन वैधव्यमाप्ते शोकसन्तप्ते च तत्पत्न्यौ अस्तिप्राप्ती मगधान् गत्वा स्वपितरं जरासन्धं प्रति सर्वं वृत्तं निवेद्य भृशमरुदताम् । प्रकृत्या निष्ठुरः स जरासन्धः रामकृष्णयोः प्रतिकरिष्यामीति त्रयोविंशत्यक्षौहिणीसैन्यैः परिवृत आगत्य यदुपुरीं पर्यवृणोत् । तावति भविष्यत्सङ्ग्रामाभिज्ञः श्रीकृष्णः यावदग्रजेन साकं मन्त्रयते स्म तावदाकाशात् तदीय साङ्ग्रामिको रथो दिव्यायुधाश्वसारथियुतः साक्षात् उपस्थितोऽभवत् । एवं समयोपनतेन परिकरेण

कृतसन्नाहौ रामकृष्णौ अल्पेनैव स्वसैन्येन सह निर्गत्य महासैन्यं तं मागधं प्रत्ययुध्येताम्। तस्मिन् कदने बलवत्प्रत्यमित्राः हठात् प्रहरन्ति स्म। इतो बलवतां बलरूपः श्रीकृष्णः सैन्यव्यूहे प्रचरमाणो विद्युत्प्रचार इव शरवर्षैः विच्छिन्द्य विच्छिन्द्य मागधबलमशेषं व्यनाशयत्। अन्ते च विरथं तं जरासन्धं बलरामः तरसासाद्य सिंह इव गजमग्रहीत्। तत्र तद्वधायोद्यतं अग्रजं प्रति एतन्मागधहेतुना भाविसङ्ग्रामादिकं प्रबोध्य तत्काले जरासन्धं सजीवममुञ्चत्। जयशालिनौ रामकृष्णौ मथुरां सहर्षं प्राविशताम्। अपमानात्तु जरासन्धस्य द्वेषः भूयोऽवर्धत। सः स्वस्थानगतोऽपि

ततः सप्तदशकृत्वस्तावदक्षौहिणीबलः।
युयुधे मागधो राजा तावत्सु च पराजितः॥

तत्समये यवनराष्ट्रे कालयवनो नाम राजासीत्। स च पापात्मा लोककण्टको यतः स स्वपापफलं शीघ्रं अनुभवत्विति मन्वानो देवर्षिर्नारदस्तमेत्य प्राबोधयत्। जरासन्धेनासकृत्प्रपीडिता यादवा इदानीं ते सुखवश्याः भवेयुरिति तं युद्धाय प्राचोदयत्। लोकस्वामिनं वशे करोमीति मनीषया मन्दमतिः सः ससैन्य आगत्य मथुरामरुणोत्। तदा श्रीकृष्णः कालज्ञो यतः पुनरपि

जरासन्धस्यागमनं वितर्क्य भाविकार्योपपत्तये देवशिल्पिनं विश्वकर्माणमाहूय पश्चिमसमुद्रमध्ये सत्वरमेव नगरनिर्माणायादिशत्। स शिल्पी च दिनान्तर आगत्य निवासाय द्वारकानगरं सज्ज मितिन्यवेदयत्। श्रीकृष्णः अग्रजाय कार्यकालं सर्वं निवेद्य स्ववसतिपरिवर्तनाय निरणैषीत्। योगमायेशो योगमायया सुगूढमेव मथुरावासिनः सर्वान् जनान् सबालान् प्राणिनश्च ससम्भारान् द्वारकां प्रापयामास। ततः प्रभाते एकाकी पद्भ्यां चलन् मथुरापुरद्वाराद्बहिर्निष्क्रामते स्म। तं दृष्ट्वा स कालयवनः "दृष्टोऽसीदानीं क्व पलायसे इत्याक्रोशन् पृष्ठतस्तमन्वधावत्। वेगप्रचलितः श्रीकृष्णः क्वचिद्दूरगत इव क्वचिद्धस्तप्राप्य इव च संलक्ष्यमाण एव तं यवनं सुदूरमाकृष्य कांचन गुहां तमस्विनीं प्रविश्य तत्रालक्षितोऽभवत्। यवनोऽपि मार्गणाय तत्र प्रविष्ट एव तत्र प्रसुप्तमेव पुरुषं दृष्ट्वा स एवायमिति कोपात् तं पदा प्राहरत्। सद्यः प्रबुद्धः स पुरुषो हुङ्कृत्य रुषा चक्षुरुन्मील्य यावत् पश्यति तत्क्षणे तत्तेजसा स यवनः दग्धो ऽभवत्। एवं च सः नष्टः।

ततस्तत्रैव प्रत्यक्षं भगवतः श्रीरूपं दृष्ट्वा स पुरुषः सविस्मयादरं पर्यपृच्छत - भो महात्मन्, को भवान्? भवत्तेजसा निर्जितोऽस्मि। अहं तु क्षत्रिय यौवनाश्वाख्यराजर्षेः पुत्रः मुचुकुन्दनामा। पूर्वमहं देवैः साह्यकरणायाहूतश्चिरं स्वर्गे असुरैः सार्धं प्रायुध्ये। ततः कालान्तरे देवसेनापतौ तत्रभवति षण्मुखे लब्धे देवाः मम निर्गमनायान्वजानन्। तदा भूरिकालश्रान्तोऽहं निद्रासुखवरमयाचे। तदा

स्वापं यान्तं यस्तु मध्ये बोधयेत् त्वामचेतनः।
स त्वया दृष्टमात्रस्तु भस्मीभवतु तत्क्षणात्॥

इति देवैः प्राप्तवरः सन् चिरमिह सुप्तवान्। तदिदानीं दग्धः कः सः? भवान् च कः? इतीमं सर्वं शुश्रूषोर्मम निवेद्य मां सान्त्वयितुमर्हसि। इत्येवं सादरं परिपृष्टो वासुदेवः स्वं दिव्यं रूपं प्रकटीकृत्य त्वदनुग्रहाय गुहागमनं भस्मीभूतं यवनं चाकथयत्। तत्र प्रसन्नाद्वरदात् मुचुकुन्दो भक्तिवरमेवायाचत। भगवान् तस्मै कामवरं दत्वा ततो निरगच्छत्। मुचुकुन्दोऽपि बदर्याश्रमं गत्वा तत्र भगवदुपासनां कुर्वन् आयुश्शेषं नीत्वा चान्ते परमपदं प्राप्तवान्।

॥ द्वारकानिवासः ॥

अत्रान्तरे त्रयोविंशत्यक्षौहिणीपतिर्जरासन्धः पुनरागत्य मथुरां न्यरुणत्। ततस्तत्र प्रतिनिवृत्तः श्रीकृष्णः दुर्गं प्रविशन्निव मागधेन दृष्टः। तत्क्षणे तं ग्रहीतुकामो जरासन्धः प्राद्रवत्। स योगेशोऽपि तस्य अप्राप्त एव भीतवत् ततः पलायत। भगवदभिसन्धिमजानन् जरासन्धः चिरमन्विष्यापि तमलभमानः प्रनष्टमेव मत्वा स्वपुराय निरगच्छत्। भगवानपि द्वारकापुरमेत्य बलरामादिभिर्बन्धुभिः सङ्गम्य तत्र विश्वकर्मनिर्मिते द्वारदुर्गतोरणगोपुरादिभिः सुरनरमन्दिरैः उद्यानकूपतटाकादिभिः सभाचत्वरविपणिश्रेणीभवनादिभिश्च परिष्कृते समलङ्कृते च द्वारकापत्तने प्रतिवसति स्म। ततश्च कालेन –

आनर्ताधिपतिः श्रीमान् रैवतो रेवतीं सुताम्।
ब्रह्मणा चोदितः प्रादात् बलायेति पुराश्रुतम्॥
भगवानपि गोविन्द उपयेमे स्वयंवरे।
वैदर्भीं भीष्मकसुतां रुक्मिणीमिन्दिरांशजाम्॥
प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान्।
राक्षसेन विधानेन उपयेम इति श्रुतम्॥

ततश्च रामकृष्णौ सकान्तौ दिव्यवैभवसम्पन्ने

द्वारकापुरे सर्वैर्बन्धुभिः सार्धं सुखेनावसताम् ।

ततः कालेन रुक्मिण्यां कृष्णस्य तनयः प्रद्युम्नो नामाजायत । स जात एव मायाशम्बरेणापहृतः समुद्रे प्रक्षिप्तश्च । कृष्णादन्यो तद्वृत्तान्तं न कोऽपि अजानात् । पुनः श्रीकृष्णस्य पत्न्यः अभूवन् । यथा स्यमन्तकमणिप्रसङ्गेन सत्राजिन्नाम वृष्णिवीरः स्वतनयां सत्यभामां, तदनन्तर एव जाम्बवान्नाम ऋक्षराजः स्वकन्यां जाम्बवतीं दत्वा विवाहमकुरुताम् । योगमायेशस्य तस्य पौरुषसौभाग्यं किमु वर्ण्यते । यतः कालकार्यकारणप्रसङ्गतः अन्या अपि कन्याः कालिन्दी मित्रविन्दा सत्या भद्रा लक्ष्मणा नाम्न्यः क्षत्रियकन्याः श्रीकृष्णं पतिमवृण्वन् । पुनश्च नरकनामक भौमासुर संहारप्रसङ्गे तेनासुरेण सन्निरुद्धाः कन्याश्च षोडशसहस्रसङ्ख्याः त्वमेवास्माकं गतिः पतिश्चेति सम्प्रार्थ्य तस्य भार्या अभूवन् । एवमष्टोत्तर षोडशसहस्रस्त्रीपतिः स भगवान् कामरूप एव तत्तत्कामान् परिपूरयन् आत्माराम एव पर्यरमत । ताः स्त्रियश्च परिरमयते स्म । तासु स्त्रीषु सन्तानप्राप्तौ क्रमेण यदुकुलं प्रजासम्पत्समृद्धमासीत् । एवं

रामकृष्णाश्रयाणाँ यादवानाँ तथा अन्धकभोज
वृष्णि कुकुर सात्वत कुलपुत्राणाँ च परमसौख्यमवर्तत

ಅಸಂಬದ್ಧಾರ್ಥಕವಾಕ್ಯಂ ಯಥಾ —

ಜರದ್ಗವಃ ಕಂಬಲಪಾದುಕಾಭ್ಯಾಂ
ದ್ವಾರಿಸ್ಥಿತೋ ಗಾಯತಿ ಭದ್ರಕಾಣಿ ।
ತಂ ಬ್ರಾಹ್ಮಣೀ ಪೃಚ್ಛತಿ ಪುತ್ರಕಾಮಾ
ರಾಜನ್ ರುಮಾಯಾಂ ಲಶುನಸ್ಯ ಕೋಽರ್ಥಃ ।

ಗೀತಾಶಾಸ್ತ್ರಪ್ರಮಾಣಾರ್ಥಂ ಧರ್ಮಸ್ವರಾಜ್ಯಪ್ರಬೋಧನಂ
ಲೋಕಸಾತ್ಮ್ಯಪ್ರದಾತಾರಂ ಕೃಷ್ಣಂ ವಂದೇ ಜಗದ್ಗುರುಂ
ಶೀತಿನೀತ್ಯೋಃ ಸುದೃಷ್ಟಾಂತಂ

| PERIOD | 1st period | 2nd period | 3rd period | 4th period | 5th period | 6th period | 7th period |
|---|---|---|---|---|---|---|---|
| MON | | | | | | | |
| TUE | | | | | | | |
| WED | | | | | | | |
| THU | | | | | | | |
| FRI | | | | | | | |
| SAT | | | | | | | |